श्रीमदान्ध्रमहाभारतकथा:

श्रीश्रीजगद्गुरुश्रीमदभिनव-
विद्यातीर्थमहास्वामिन:

श्रीश्रीजगद्गुरुश्रीभारती-
तीर्थस्वामिन:

JACL-KRC
008528
2
SM
8528

प्रणेता
गरिकपाटि लक्ष्मीकान्त:, एम्.ए. (विद्वान्)
भूतपूर्व आन्ध्रशाखाध्यक्ष:
निज़ाम् कलाशाला, हैद्राबाद: 500 044 (आं.प्र.)

योऽनूचानः स नो महान्
राष्ट्रिय संस्कृत संस्थान

राष्ट्रिय संस्कृत संस्थान, जयपुर परिसर

पुस्तकालय

पुस्तक संख्या ....

वर्गीकरण संख्या ....

8528

राष्ट्रिय संस्कृत संस्थान, जयपुर
परिसर

वर्गीकरण सं. ....
पुस्तक सं. 8528........ दिनाङ्क....................

यह पुस्तक नीचे अङ्कित तिथि या उससे पूर्व लौटा दी जानी चाहिये। यदि पुस्तक निर्धारित तिथि से अधिक समय तक पाठक अपने पास रखेंगे तो 50 पैसे प्रतिदिन के हिसाब से विलम्ब शुल्क देय होगा।

Address

1-9-327, Vidyanagar, Hyderabad-500 044 (A.P.)

12.2f

Sanskrit Books By GARIKAPATI LAKSHMIKANTAIAH

Books published: Poetry

1. Harastutih 2. Kirasandesah 3. Ashtaka Panchakam 4. Jaladhijananda Lahari 5. Sri Bhavani Sankara Stuti Pu-Pushpanjalih 6. Sringagiri Sri Jagadguru Charitra Sangrahah 7. Sri Vidya Sankara Bharati Vijaya 8. Sri Narayana Tirtha Yatindria Charitram 9. Bhavya-Bharatam 10. Viswa Kavih 11. Bharata Ratnam 12. Sri Venkateswara Stutih 13. Jayadeva Charitram, Srimad Andhra Maha Bhagavata Kathah: 14. Dhruvoparayanam, 15. Bharatopakhyanam 16. Chitra-Ketupakhyanam 17. Sri Rama Charitram 18. Rukmini 19. Kaliya Mardanakatha 20. Kuchelopakhyanam, Kalyanam Shrimad Andhra Maha Bharatha Kathah: 21. Dharmaja Rajasuyam 22. Kausika Dharma Vyadhopakhyanam 23. Sri Krishna Dautyam 24. Dushyantacharitram 25. Pandva Krita Viratasrayanam 26. Sri Sarada Vayasa Maniharamu (Critical essays in Telugu Prose on Sanskrit and Telugu Language and Literatures useful for students of High Schools, Colleges and Oriental Institutions).

Books unpublished: Poetry

27. Sri Jagadguru Sri Bharati Tirtha Swami Charitra Sangrahahs 28. Jagadguru Sri Bharati Tirtha Swami Stuti 29. Samsmritih 30. Yasas Chandrika 31. Kirtikoumudi 32. Jaati Pita.

Books unpublished

Sanskrit Prose

33. Sanskrita Kavya Kathah 34. Balakandam 35. Sundram Kandam 36. Broadcasts in Sanskrit from AIR, Hyderabad.

श्री जगद्गुरु अमोघाशीर्वचनमुलु

श्री श्री जगद्गुरु शङ्कराचार्य महासंस्थानम्, शारदापीठम्, शृङ्गेरी

Private Secretary
To His Holiness Sri Jagdguru
Sankaracharya, Dakshinamnaya
SRI SARADA PEETHAM
SRINGERI–577 139 (Karnataka)

Ref : No. 7577
Camp. शृङ्गेरी
Date : 5-11-1980

Regd. Post with Ack. Due.

श्री गरिकपाटि लक्ष्मीकान्तय्यगारिकि नमस्कारमुलु. तमरु व्रासिन पत्रमु अन्दिनदि. श्रीचरणुलकु समर्पिञ्चितिनि.

तमरु रचिञ्चिन "श्रीमदान्ध्रमहाभारतकथा" अनु ग्रन्थमुद्रणमुनकु श्रीवारु आशीर्वादरूपमुगा अनुग्रहिंचिन रु. 1000-00 (वेय्यि रूपायलु) कर्णाटक ब्यांक् लिमिटेडु, शृङ्गेरी ड्राफ्ट्मूलमुगा पंपुचुन्नानु. इदि तमकु अन्दिनवेंनं तेलुपगलरु.

D.D. No. 11847/3/80 Dated 3-11-1980.

श्री भगवती अनुग्रहमुवलन तमरु सङ्कल्पिञ्चिन कार्यक्रममु निर्विघ्नमुग जरुगुगाक यनियु तमकु श्रेयस्सु लभिचु गाक यनियु श्रीवारु आशीर्वदिंचिनारु.

Encl. one D.D.
for Rs. 1,000/-

इन्ते नमस्कारमुलु
(Sd.) गिरिधरशास्त्री
Private Secretary,

सर्वोदय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक 8528

JACL-KRC
008528

॥ ओम् ॥

॥ कृतिसमर्पणम् ॥

श्रीमत्परमहंसपरिव्राजकाचार्यवर्येत्यादिबिरुदभूषितानां ऋश्य-श्रृंगपुरवराधीश्वर-तुङ्गभद्रातीरवासि-श्रीमद्विद्याशङ्करपादपद्माराधक-श्रीजगद्गुरुश्रीचन्द्रशेखरभारतीस्वामिगुरुकरकमलसंजात-श्रीश्रृङ्गगिरि-शारदापीठाधीश्वरश्रीजगद्गुरुश्रीमदभिनवविद्यातीर्थमहास्वामीचर-णानां, श्रीमत्परमहंसपरिव्राजकाचार्यवर्येत्यादिबिरुदशोभितानां श्रीमद-भिनवविद्यातीर्थमहास्वामिगुरुकरकमलसञ्जातानां श्रीजगद्गुरु श्री-भारतीतीर्थस्वामिवर्याणां च दिव्यश्रीपादकमलयोः भक्तिविनयसहित-साष्टाङ्गप्रणामशतपुरःसरं समर्पितमिदं काव्यं श्रीमदान्ध्रमहाभारत-कथानामकं श्रीजगद्गुरुणां पादपद्माराधकेन श्रीगुरुचरणकमलरेणुना प्रणेत्रा गरिकपाटच्युपनामकेन श्रीमदन्नंभट्टविद्वत्तल्लजवंशजेन लक्ष्मी-कान्तेन ।

काव्यस्यास्य मुद्रणविषये सदयं अमोघाशीर्वचनपुरःसरं रूप्यक-सहस्रवितरणेन अनुगृहीतवतां श्रीश्रृङ्गगिरिजगद्गुरूणां साञ्जलिरहं कृतज्ञताबद्धः ॥

1-9-327, विद्यानगरम्, इति

हैदराबाद–44 (आं. प्र.) लक्ष्मीकान्तः

1–2–1981

।। विज्ञप्तिः ।।

सुप्रसिद्धान्ध्रकवित्रयप्रणीतात् श्रीमदान्ध्रमहाभारतात् संगृह्य धर्मजराजसूयं, कौशिकधर्मव्याधोपाख्यानं, श्रीकृष्णदौत्यं, दुष्यन्तचरित्रम्, पाण्डवकृतविराटाश्रयणम्, इति पञ्च कथाः श्रीमदान्ध्रमहाभारतकथा इति नाम्ना उन्नतपाठशालाविद्यार्थिनां, कलाशालाविद्यार्थिनां, तदितरेषां च उपयोगाय मया यथाशक्ति लिखिताः ।

ग्रन्थस्यास्य मुद्रणसौकर्यार्थं सदयं सहस्रद्वयरूप्यकवितरणेनानुगृहीतवतः आंध्रप्रदेशसाहित्यपरिषदध्यक्षाननैकभाषाकोविदान् डा. बेजवाड गोपालरेड्डिमहोदयान्, विद्वत्कविपोषणपरायणान् परिषदुपाध्यक्षान् श्रीदेवुलपल्लिरामानुजरायमहाभागान्, परिषत्कार्यदर्शिनः सौजन्यमूर्तीन् डा. इरिवेण्टिकृष्णमूर्तिमहाशयान्, तदितरसभ्यवर्यांश्च अत्यन्तकृतज्ञतापुरःसरं स्मरामि ।।

ग्रन्थस्यास्य आंग्लभाषायां रचितेनोपोद्धातेन अनुगृहीतवत उस्मानिया विश्वविद्यालयसंस्कृतविभागे आचार्यपदस्थितस्य संस्कृतपरिषदध्यक्षस्य सुगृहीतनामधेयस्य डा. पुल्लेलश्रीरामचन्द्रमहोदयस्य, काव्यस्यास्य सदयं शुद्धप्रतिलेखनेन प्रथममुद्रितपत्रपरिशोधनेन अमूल्यअभिप्रायदानादिना च उपकृतवतः विद्वत्प्रवरस्य हिन्दीमहाविद्यालये उपप्राचार्यस्य विनयाकृतेः आत्रेय वेंकटसुब्रह्मण्यशर्ममहाभागस्य सदयं स्वाभिप्रायप्रदानेन कृतोपकारस्य साहित्यव्याकरणशिरोमणि बिरुदालंकृतस्य वेंदान्तवर्धिनीसंस्कृतकलाशालायाः भूतपूर्वप्रधानाध्यापकस्य तत्रभवतः श्रीखण्डवल्लिनरसिंहशास्त्रिवरेण्यस्य च सादरं सविनयं कृतज्ञतां प्रकटयामि ।।

इति विधेयः,

–गरिकपाटि लक्ष्मीकान्तः

Vedanta Siromani,
Vedanta Visarada, Vidwan
Dr. P. SRI RAMACHANDRUDU,
M.A.Ph.D.(Skt.) MA. (English) M.A.
(Hindi), Reader in Sanskrit and
Director of Sanskrit Academy,
Osmania University,

Phone No. 71006
....
....
Hyderabad-500007
Date 6-8-1980

INTRODUCTION

Telugu literature was very much influenced by the Sanskrit literature in the early stages of its development. Almost all the important works in Sanskrit, Itihasas, Puranas and Mahakavyas etc. were either translated or adapted into Telugu. Andhra Mahabarata which was started by the earliest Telugu poet Nannaya, continued by Tikkana, and completed by Errapragada, is the earliest Telugu work based on the Mahabharata in Sanskrit. It is not a mere word to word translation of the original Itihasa. It is a skilful adaptation into Telugu where the poets have successfully tried to show their poetical genius by introducing many innovations more suited to the taste of the people of their ages. Thus one can find in these works some portions which would appear almost original with some charm of their own which may not be found in the original Sanskrit text.

It is but natural that some gifted Sanskrit writers should try to enrich the Sanskrit literature by bringing some of these beauties into this language also. It is in this laudable attempt that Sri Laksmikantayya garu has selected five portions or stories from the Telugu Mahabharata and rendered

them into Sanskrit which gave to the Sanskrit world a beautiful Sansktit poem. This poet has about 20 Sanskrit poems to his credit. He is adept in using Vaidarbhi style and each and every verse from his work can be taken as an example of Prasádaguna. All the Sanskrit scholars, especially from non Telugu regions, are indebted to this poet for having shown them the taste of Andhra Mahabhrata through this translation. May God give us many more works of this nature through the fertile pen of Sri Lakshmikantayya garu.

Sd/-

(Dr. P. Sri Ramachandrudu)

अभिप्रायः

गरिकपाटिलक्ष्मीकान्तार्येण विरचितं सत्काव्यं श्रीमदान्ध्रमहाभारतकथानामकं पठित्वा अमन्दानन्दमग्नोऽमहभवम् । कविवर्येणानेन इतः पूर्वं संस्कृतभाषायां बहवो ग्रन्थाः विरचिताः पण्डितानां सशिरः-कम्पं प्रशंसां प्राप्नुवन् ॥

आद्यान्ध्रकविचक्रवर्तिनां नन्नयादीनां असमानप्रतिभाव्युत्पत्ति-संपत्तिः, तेषां कवितारचनायामपूर्वकौशलं, आन्ध्रमहाजनानां सभ्यता, ज्ञानविज्ञानवैभवं, आन्ध्राणां सदाचारव्यवहारवैशिष्ट्यं, आन्ध्रवीराणां शौर्यधैर्यसाहसौदार्यराजनीतिप्रशस्तिः, सर्वमपीतरत्स्पृहणीयं काव्येऽस्मिन् प्रतिबिम्बितं आन्ध्रेतरपण्डितानां वैदेशिकविद्वज्जनानां च अमन्दानन्दाय कल्पते ।

कारकमर्यादोपेतप्रसादगुणभूयिष्ठकाव्यरचनायां, शास्त्रे दृष्टानां व्यवहारदशायां तु सकृद्दृष्टानां शब्दरूपाणां प्रयोगे चायं कविः सिद्धहस्त इति निवेदयितुमतीवाभ्युत्सहे ॥

इति

(Sd.) खण्डवल्लि नरसिंहशास्त्री

1-1-1981

– धर्मजराजसूयम् –

श्रीकृष्णो जगदाराध्यो धर्मजं धर्मरूपिणम् ।
द्वारकायाः समागत्य मणिभिः पर्यपूपुजत् ॥ 1

लोकाराध्यं परम पुरुषं धर्मजश्श्रीहरिं तं
पाद्यै रर्घ्यैः सुरभिकुसुमैः धूपदीपैश्च वस्त्रैः ।
दिव्यैः खाद्यै र्विनयसहितस्सोऽर्चयित्वा समक्षं
धौम्यादीनां तमवदनघो याजकानां स्वकानाम् ॥ 2

श्रीरमाधव ! धर्मतत्त्वनिधान ! दानवदर्प सं–
हार ! वारिजनाभ ! बन्धुजनानुरञ्जन ! माधव !
भूरिविक्रमतोऽभवन्वशगा धरातलभूभुजः
त्वत्कृपावशतः प्रभो ! वय माप्नवाम महोन्नतिम् ॥ 3

देवानां मुखभूतवह्निकृत सद्धोमैः श्रुति प्रेरितैः
भूदेवेष्ट सुदक्षिणावितरणैर्यज्ञं कमप्युत्तमम् ।
नोचेदुत्तम राजसूय मनघं मां कारय श्रीहरे !
तृप्तिं सम्यगनूपमां जनय मे लोके जनानां सताम् ॥ 4

धर्मजस्य वचः श्रुत्वा परमानन्द संभृतः ।
धर्मजं तमुवाचैवं श्रीकृष्णस्सर्वधर्मवित् ॥ 5

पूज्यस्त्वं सकलान्वयेषु धरणीपालेषु भूमण्डले
प्राज्याखण्ड विभूतिभिस्त्रिदिवराट् तुल्योऽसि निस्संशयम् ।
साम्राज्येन दिवौकसामपि नृणां साहाय्यसंपत्तितो
हे धर्मात्मज ! सर्वलक्षणयुतस्त्वं याज्य एवासि भोः । 6

'शासनेऽपि गुरुणि व्यवस्थितं
कृत्यवस्तुषु नियुंक्ष्व कामतः ।
त्वत्प्रयोजन धनं धनं जया
दन्य एष इति मां च मावगाः ॥ 7

श्रीकृष्णेनैवमुक्तश्श्री धर्मजस्सवनेरतः ।
धौम्येन सोदरैर्व्यासमहर्ष्यादिभिरीडितः ॥ 8

सहदेवस्समाज्ञप्तो धर्मजेनाध्वराय सः ।
मुख्योपकरणादीनां संपादन विधौ रतः ॥ 9

निर्माप्य शिल्पि साहाय्या दध्वरायतनानि सः ।
यज्ञोपकरणादीनि संभृतान्यकरोदद्रुतम् ॥ 10

हरिप्रस्थपुरं सम्यक् परितःसौधसञ्चयम् ।
क्रीडा वनानि वाप्यश्च दीर्घिका निरमापयत् ॥ 11

आसनानि महार्हाणि कारयामास सत्वरम् ।
सन्नद्धमभवत् सर्वं राजसूयक्रतोः कृते ॥ 12

शासनेन सहदेवकृतेन
भ्रातृपुत्र सखि बन्धु समेताः ।
भूभृतः सकलदिग्वलयस्था
आगता रचित विष्टरसुस्थाः ॥ 13

वेदवेदांग निष्णाता ब्राह्मणास्स्वस्वकर्मसु ।
निरता वैश्यशूद्राश्च स्वस्व स्थानेषु सुस्थिताः ॥ 14

नकुलेन समाहूता भीष्माद्या हस्तिपट्टणात् ।
राजसूयस्य वीक्षार्थमागता धनराशिभिः ॥ 15

धृतराष्ट्रं गुरुं भीष्मं कृपं द्रोणंच भानुजम् ॥
दुर्योधनं च तद्भ्रातृन् सत्कृत्य यमनन्दनः ॥ 16

उद्युक्तोऽहं राजसूयं विधातुं
ऊर्ध्वत्विज्यास्तुल्यरीत्या सहायाः ।
निर्वर्त्येदं राजसूयं यथावत्
सर्वे यूयं गच्छतार्याःप्रकीर्तिम् ।। 17

इत्युक्त्वा तांस्तत्सहायं समिच्छू
रत्न स्वर्णत्रापुषादि प्रदाने ।
विद्वान् भूपो दक्षिणाराजिते स्वे
यज्ञे योग्यं तं कृपं सुन्ययुंक्त ।। 18

कृताकृत विवेचने स च नियुज्य भीष्मं गुरुं
न्ययुंक्त विदुरं बुधं व्ययकृतौ पदार्थावलेः । 19

उपायन परिग्रहे सकल देश भूजानित
स्सुयोधन मथाऽवृणो दशनदं स दुश्शासनम् ।। 20

विवेश धर्मजो यज्ञायतनं द्रौपदीयुतः ।
विप्रै र्नीतिथि रात्मीयैर्दीक्षित स्सवनकर्मणि ।। 21

प्रीत्या लोकाः सद्गुणाढ्यं नृपेन्द्रं
भक्त्याऽपश्यन् दीक्षितं धर्मराजम्
धर्मं मूर्तीभूत माश्रित्य-तेजो ।
ब्राह्मं क्षात्रं भूषणानामिवैकम् ।। 22

ब्रह्मण्यैः ब्राह्मणैः साकं परीतो धर्मनन्दनः ।
ब्रह्मा वा शुशुभे ब्रह्म ऋषिभिः परिवेष्टितः ।। 23

वेदानां निनदो विप्राशीर्वादनिनदो महान् ।
वादित्राणां ध्वनिश्चक्रे दिशो बधिरिता स्तदा ।। 24

होतारौ पैल धौम्यौ महतिच सवने याज्ञ्यवल्कयेऽगऋत्विक्
व्यासो ब्रह्मा बभूवु स्तदनु गुरुसुधी स्सामगोऽभूत्तुसामः

तत्पुत्रा शिशष्यवर्या: पितृपति तनयेनर्त्विजोऽन्ये वृतास्स्युः
ब्रह्मर्षिब्र।त आसीत्सदसि नियमितः पर्यवेक्षाविधाने ।। 25

'तस्य सांख्य पुरुषेण तुल्यतां विभ्रतस्स्वयमकुर्वतःक्रियाः ।
कर्तृता तदुपलंभतोऽभवद्वृत्तिभाजि करणे यथर्त्विजि ।। 26

वद्ध दर्भमय कांचिदामया वीक्षितानि यजमानजायया ।
शुष्मणि प्रणयनादि संस्कृते तैं र्हवींषि जुहवांबभूविरे ।। 27

नांजसा निगदितुं विभक्तिभिर्व्यंक्तिभिश्च निखिलाभि रागमे ।
तत्रकर्यणि विपर्वणी नमन्वन्त्रमूह कुशलाःप्रयोगिणः ।। 28

संशयाय दधतो स्स्वरूपतां
दूरभिन्नफलयो:क्रियां प्रति ।
शब्दशासनविद स्समासयो
र्विग्रहं व्यवससु स्स्वरेण ते ।। 29

लोल हेति रसना शतप्रभा–
मण्डलेन लसता हसन्निव ।
प्राज्यमाज्य मसकृद् वषट्कृत
निर्मलीमस मलीढ पावकः ।। 30

तत्र नित्य विहितोपहूतिषु
प्रोषितेषु पतिषु द्युयोषिताम्
गुम्फिता शिरसिवेणयोऽभव
न्न प्रफुल्ल सुर पादप स्रजः ।। 31

नापचार मगमन् क्वचित् क्रियाः
सर्वमत्र समपादि साधनम् ।
अत्यशेरत परस्परं धिय
स्सत्ति णां नरपत्तेश्च संपदः ।। 32

निर्जिताखिलमहार्णवैषधिस्यन्दसारममृतं ववल्गिरे ।
नाकिनः कथमपि प्रतीक्षितुं हूयमानमनले विषेहिरे ॥ 33
दक्षिणाय मवगम्य पंक्तिशः पक्तिपावनमथ द्विजव्रजम् ।
दक्षिणः क्षितिपतिर्व्यशिश्रणद्दक्षिणास्सदसि राजसूयकीः ॥ 34
किंनु चित्र मधिवेदि भूपति र्दक्षयन् द्विजगणानपूयत ।
राजतः पुप्रुविरे निरेनसः प्राप्य तेऽपि विमलं प्रतिग्रहम् ॥ 35
उन्नमन्सपदि धूम्रयन्दिशः सान्द्रतां दधदधः कृताबुंदः ।
द्यामिमाय दहनस्य केतनः कीर्तयन्निव दिवौकसांप्रियम् ॥ 36
प्राशुराशु हवनीयमत्रयत् तेन दीर्घममरत्वमध्यगुः ।
उद्धतानधिकमेधितौजसो दानवांश्च विबुधा विजिग्यिरे ॥ 37
निर्गुण ऽपि विमुखोनभूपतेर्दानशौण्डमनसःपुरोऽभवत्
वर्षुकस्य किमपः कृन्नोन्नतेरंबुदस्य परिहार्यमूषरम् ॥ 38
वारिपूर्णमखिलासु सत्क्रियाशव्धशुद्धिषु धनानि वीजवत् ।
भाति विभ्रति फलं महद्द्विजक्षेत्रभूमिषु नराधिपोऽवपत् ॥ 39
स्वादयन्रसमनेकसंस्कृतप्र कृतं कृतपात्रसँकरैः ।
भावशुद्धिसहितैर्मुदंजनो नाटकैरिव बभार भोजनैः ॥ 40
धान्यै रथैस्समृद्धः श्रुतिभिरभिहितैः सत्क्रियासत्कलापैः
सम्पूर्णैर्दक्षिणाद्यैरभिमतफलदैष्षड्भिरंगैस्सनाथः ।
श्री श्री कृष्णस्य रक्षाकरणशुभकरा लोकमोद दधानो
भ्रमाद नांच साह्य दकरण रहितो राजसूयो दिदीपे ॥ 41
तमिन् यज्ञऽतिपूते विधिकृतबहुलैराहुतीनां कदबै
रग्नौ सर्वेच देवा धरणिसुरवरा दक्षिणाभूरिदानैः ।
राजन्याश्शस्तरीत्या विहितबहुविधैस्सत्कृतीनां विशेषैः
मिष्टान्नप्राप्तिहेतो रखिलजननतति स्तृप्तिमाप्ता नितान्तम् ॥ 42
अनघं धर्मसूनुं तं भ्रातृबन्धुसमन्वितम् ।
निमज्योन्मज्ज्य हर्षाब्धौ सर्वे तुष्टुवुरुत्तमम् ॥ 43
राजसूयमहायागं भीष्मःप्रेक्ष्य मुदन्वितः ।
धर्मंयूपं धृतेर्मूलमुवाचैवं स धर्मजम् ॥ 44

एते पूयास्सद्गुरुस्स्नातकश्च स्वेष्टो राजा संयुगर्त्विक्पुमांश्च
एतेषां य स्सदगुणैर्वृद्धउक्तो यज्ञेऽस्मिंस्ते पूजनीयः सचाग्रे ।। 45

कस्तादृशोऽस्ति मां विद्वन् ! बद पूज्यस्सभास्थले ।
अस्मिन्निति निशम्येदं वचो भीष्मोऽवदन्नृपम् ।। 46

यथार्क स्तेजोभिर्दिव मखिलभूमि रचयति
प्रदीप्तां, चन्द्रस्स्वैः किरणनिचयै ह्लादयतिर्हलभोः
तथा लोकान् सर्वान्परमपुरुषो द्योतयति यः
स्वधाम्ना सोऽर्च्यस्ते सदसि यदुवीरोऽत्र भगवान् ।। 47

समाकर्ण्येदं श्रीगुरुवचनमर्घ्यं सविधिवत्
समार्पत् कृष्णायाऽनघसुचरितायाऽखिलविदे ।
समालोक्याघ्र्यं तद्धरिचरणनिक्षिप्तमनघं
प्रकोपोद्दीप्तस्सन् वदति शिशुपालःस्म नृपतिम् ।। 48

भूनाथाः सन्त्यनेके धरणिसुरवराः संत्यमनेके सुपूज्या
गांगेयेनोपदिष्टाशयहतधिषणो गोपकं कृष्णमेनम्
संपूज्य स्वार्घ्यपायोचितपरिकरतोऽनर्घ्यवस्त्रोपहोरेः
सम्यक् ते नीचबुद्धि प्रकटयसि मरवागारमध्ये नरेन्द्र ।। 48

अगम्या धीराणामपि परमधर्मस्य सरणिः
जडो भीष्माचार्यो जडमति महो त्वां बहुविधैः
अधर्मं संश्राव्यानयदवमतिं त्वां क्रतुपरे
समार्च्यस्त्वं निन्द्यं चलितमतयो वृद्धगुरवः ।। 50

यदिहरिः परमाप्त इतीर्यते कुरु तदीयहितं धनदानतः
द्विजधरेशसदस्यतिगर्हितं नरसमर्चनमार्यजनाऽहितन् ।। 51

वृद्धत्वमस्य भजने न निदान मग्र्यं
वृद्धेषु वृद्धवसुदेवनृपस्य सत्त्वे
आर्विज्यमस्य भजने न निमित्तमास्ते
द्वैपायने सति महर्त्विजि सर्वविज्ञे ।। 52

आचार्यताऽस्य भजनेन निदान मीड्यं
द्रोणे कृपे च सति बोधविधौ समर्थे ।।

राजत्वमस्य भजने न च मुख्य बीजं
नास्त्येव यादवपते र्नृपता प्रसिद्धा ।। 53
एवं हरेर्नहि पदं परिदृश्यतेऽत्र
पूज्येषु यागपरिषत् स्थतपण्डितेषु
पूज्यार्चनां न विदधत् स्वयमत्र यागे
भीष्मोपदेशवशतोऽसि हतोचितिस्त्वम् ।। 54
पूज्यः पुंसामधिकनयवित् पण्डिताग्रेसर स्त्वं
युद्धस्थैर्याजितबहुयशा इत्यनेके महीन्द्राः ।
मत्वा याग तव सुचरिते राजसूयेऽत्र सुस्था
एवं तेषां कृतिरवमतेर्नोचिता नापिऽधर्म्या ।। 55
संश्रावणा यद्वदकर्णकस्य गीते यथान्धस्य सुरूपवीक्षणा ।
नपुंसकस्यार्पणमंबुजाक्ष्यास्तथा वृथास्या द्धरिपूजनं ते ।। 56
हसत्सु सर्वेष्वपि राजलोकेष्वमोघतां प्राप्तवति त्वदार्जिते ।
न नाम्नि धर्मकृति रित्यमूल्ये न सांप्रतार्चा तव गोपकस्य ।। 57
निन्दन्नेवं धर्मजं कृष्णभीष्मौ कोपोदग्रो वाहिनीभिस्स्वमित्रैः ।
तत्याज श्रीचैद्यभूपस्सगर्वः शान्तां पूतां राजसूयस्य शालाम् ।। 58
सँत्यज्य यागशालाँ ताँ गच्छन्तँ शिशुपालकम् ।
सान्त्वयन्नेवमूचे श्रीयुधिष्ठिरनृपो वचः ।।
वाक्पारुष्यं युज्यते नैव राज्ञां धर्म ज्ञानां शस्तसौजन्मभाजाम्
वाक्पारुष्यं दारुणं घोरवह्नेः क्रूरं राजन् ! जांगलादित्यभिज्ञाः ।। 59
आद्यो ब्रह्मोत्पत्तिहेतुर्मुरारिः शस्तो वेदादौ स्वरत्वेन धीरैः
पूज्य स्सर्वेष्वग्रतोऽशेषलोकेष्वित्यर्घ्यं श्रीकृष्णदेवाय दत्तम् ।। 60
यथा भीष्मो हरिंवेत्ति परमार्थैकदृग्युतः
तथा त्वं तं न जानासि, नाल्पाविन्दन्ति सत्कथाम् ।। 61
पालितदुर्णयस्य शिशुपालनृपस्य दुराग्रहस्य स–
च्छीलवतां भृशं परिभवाचरणे निरतस्य सन्ततम् ।
नै[illegible]धुक्षमाभरणनष्टविवेकधनस्य सान्त्वनं
सा[illegible]नमीश ! धर्मसुत ! धर्मनिधान ! न साम्प्रतं तव ।। 62
अ[illegible] श्रीहरयेऽर्पितं समुचितं नेत्युक्तवान्दुर्मते !

मूर्ख ! त्वं, सदसि स्थिता नृपतय स्सर्वेप्यभीक्ष्णं पुरा ।
घारेष्वाहवसञ्चयेषु विजितास्तेन प्रपत्ति गता
स्तं, तद्दिव्यकृपावशेन सुगता मुक्तिं दुढाद्बन्धनात् ।। 63
अर्भकोऽप्युत्तमज्ञानवृद्धः पूज्यश्शुचिर्द्विजः
क्षत्रः पूज्योऽधि कोराज्ञामतिविक्रमहेतुतः ।। 64
हेतुद्वयेन हरिरेव समर्हतीड्यो
यागेऽर्घ्यमत्र धरणीधरणक्षमोऽयम्
अस्माकमेव न समर्च्यऽउदात्तवृत्तः
त्रैलोक्यवर्तिजनतापरिपूज्य एषः ।। 65
वृद्धा नार्हन्ति पूजां ये लक्षसंख्याधिका अपि ।
गुणवृद्धोऽत्र भूजानिष्वच्युतः पूजितोऽभवत् ।। 66
बुद्धिश्चित्तं प्रकृतिपुरुषावबरं भूमिरापो
वेदास्सूर्यः पवनहरिती चन्द्रमाःकाल एवम्
सर्वं भूत्वा स्वय मवति यस्सर्वभूतप्रपञ्च
स्वीयेऽगाधे जठरकुहरेऽखण्डशक्त्या निवेश्य ।। 67
य स्सर्वात्मा जयति निखिलै रर्चनीयोऽप्रमेयो
यंयोगीन्द्रास्सततनिरताः प्रेक्षितुं योगशक्त्या
मौढ्यग्रस्तः कथमपि पशो वेदितुं तं समर्थो
दृप्तश्चेद्य ! त्वमिति गदितो भीष्मविद्वद्वरेण्यैः ।। 68
भक्त्या नीत्याऽधिक इति दृशा विष्णवे दत्तमर्घ्यं
नांगीकुर्मो वयमिति नृपा येवदन्त्यद्य दुष्टाः
तेषां मूर्धन्यहमिति पदं निक्षिपाऽमिस्वकीयं
माद्रीपुत्रावरजगदितं वाक्य मार्या महान्तः ।। 69
श्रुत्वा भीतास्सदसि न किमप्युक्तवन्तः स्थितास्ते
पौष्पी वृष्टिर्न्यपतदनघस्यास्य शीर्षे नभस्तः
प्रावर्तन्त श्रुतियुगसुखास्साधुवादास्सभास्था
आश्चर्येणाकुलितहृदया स्संबभूवुस्समस्ताः ।। 70
शिशुपालस्य सेनानी स्सुनीथुः परुषं वदन्
प्रभुपक्ष्ये स युद्धाय सन्नद्धोऽभवदुद्धतः ।। 71

वेगास्तब्धतरंगवीथिकलितो मत्तेभनक्रान्वित
स्संवेल्लद्भटमत्स्यबृन्दसुहितो दोषोग्रवास्वाहतः ।
श्रीवृष्णिप्रमुखेशभूरिपृतनापाथोधिरुग्रोद्धतो
रेजे, शत्रुहृदन्तरालदलनामोघः क्षणे निस्तुलः ।। 72
विघ्नं निवारय मखस्य गुरो ! प्रशान्ति
लोकस्य संजनय सत्वरमार्यं चित्ते ।
एवं निशम्म कथितं नृपधर्मजेन
प्रोवाच भीष्मगुरुराट् स युधिष्ठिरं तम् ।। 73
विघ्नं कर्तं मखस्यास्य नालंकोऽपि महीपते ।
अजेयपौरुषे यज्ञपूरुषे तस्य रक्षके ।। 74
ये ये श्रीदमघोषनन्दनजयं कांक्षन्ति ते ते नृपाः
श्री कृष्णाक्षियुगेन कोप कलितेनैवैकदा वीक्षिताः ।
मृत्युं यान्ति न शक्नुवन्ति शुनका नैकेऽपराद्धुं महा
सिंहस्यास्य हरेः पराक्रमकथा लंके न केन श्रुताः ।। 75
शिशुपालस्समाकर्ण्य भीष्मप्र क्तमिदं वचः ।
क्रुद्धो भूत्वाऽवदच्चैवं बुद्धिहीनो गतौचितिः ।। 76
जडस्त्वं हे भीष्माच्युतनुतिसमासक्तहृदयो
न वेत्त्यन्यो धर्मं सकलमपि धर्मं स्वयमहम् ।
भृशं जानाम्यार्या अपि यमसुताद्या इति भवान्
अहंकाराद्राज्ञः परिभवयुतान्सम्यगकरोत् ।। 77
धर्मात्मजस्त्वामवलम्ब्य कृष्ण
साहाय्यमाप्त्वा नरदेवलोकान् ।
बिभीषिकाभिस्सह भीतभीता
न्वृथा विधातुं यततेस्मचार्यान् ।। 78
पूतनाहरणादीनि स्वल्पकृत्यानि चक्रिणः ।
शंसतस्तव जिह्वाग्रं भेत्स्यामि शतधाऽसिना ।। 79
अन्यस्य कीर्तनं चान्यनिन्दाचात्मीयसंस्तुतिः ।
अनार्यंवर्तनानीति ब्रुवन्ति श्रुतिवेदिनः ।। 80
रूक्षाक्षरवचोभिस्तं निन्दन्तं भीष्मपण्डितम्

शिशुपालं समीक्ष्य श्रीभीमो भीमाकृतिर्बभौ ।। 81
प्रकटितषट्कोपावेगतस्तस्य पद्मा
यतनयनयुग तद् भीकरं स्वारुणिम्ना ।
त्रिपथगपृथुगंगा वा त्रिकूटस्थिता त
द्भृकुटिरभवदुच्चैस्तल्ललाटे त्रिशाखा ।। 82
भीष्मार्यः पवनात्मजं बहुविधैस्तं सान्त्वयन्नब्रवीत्
श्रीकृष्णस्य वरेण नैवनिहतस्स्यादन्यवीरैरयम् ।।
यावन्नास्य शतापराधनियम स्संपूर्णतां यास्यति
श्रीकृष्णेन ततो भवेत् सुनिहतो दुष्टोयमुग्रस्थितिः ।। 83
नो चेदन्येऽधिक्षिपन्तस्सभायां
मामैवं मत्तीक्ष्णबाणप्रभिन्नाः ।
किं न स्युर्द्राक् प्रेतराड्गेहमाप्ता
भीम ! प्राज्यामोघदोश्शक्तिशोभिन् ।। 84
शिशुपालस्समाकर्ण्य प्रसंगं भीष्मभीमयोः ।
अच्युताभिमुखो भूत्वा निन्दितुं तं प्रचक्रमे ।। 85
अमान्यं त्वां गोप स्थविरतमभीष्मस्य वचसा
समार्चन् श्रीपाण्डुप्रभुवरसुतास्संसदि जडाः
स भीष्मो गर्वान्धस्त्वमपि यमसूनुप्रभृतयो
मया युद्धं यूयं विदधत सधैर्यास्सजनपाः ।। 86
श्रुत्वा गर्वोक्तमीशो हरिरिदमवद्राजलोके समित्यां
शृण्वत्याबालवृद्धप्रबलभयकरो द्वारकां सन्ददाह ।
अन्यत्रास्मासु सत्सु प्रियतमवनितासगतांस्तालयं द्राक्
भोजाधीशान्स्म हन्ति, श्रुतिहितसवनस्यान्तरायं च चक्रे ।। 87
हृत्वा यागस्य वाहं युवतिमहरताऽयं शठो बभ्रुनाम्नः
सात्वत्या प्रार्थ्यमानस्सदयमविरता दुष्कृतीरस्य सम्यक् ।
क्षान्त्वाऽतिष्ठं दुरात्माऽप्रियवचनशतेनाद्य सञ्जात एष
द्वेष्योऽसह्योऽनुपेक्ष्यः स्वयमधिकशतं मंतुवर्गं विधाय ।। 88
श्रुत्वा वाक्यं सात्वतेयो हरे स्तत्
क्रुद्धोऽवोचत् स्नेहवृद्ध्या तावाद्य ।

किं, त्वद्वैरेणापि मे किं, दुरात्मन्
कन्या दत्ता मे त्वयोढाऽपकर्त्रा ।। ८९
एवं निन्दति सात्वतीप्रियसुते श्रीकृष्णमार्यं वृथा
तच्चक्रं प्रबलोग्रवह्निरुचिमत्तद्राजचक्रेऽखिले ।
पश्यत्युत्कटभीतिसाध्वसगते चिच्छेद तच्छीर्षकं
तद्देहाद् बहुरक्तनालगलिता धारा दिवं संगताः ।। ९०
सात्वत्यास्सुतदेहमद्रिसदृशं चक्राहतं भूतले
सध्वानं न्यपतत्तदीयतनुतस्तेजो बहिर्निर्गतम् ।
आकाशं द्युतिमत्तदा विरचयल्लीनं तनौ श्रीहरे
राश्चर्येण विकासमात्तनयनैः पश्यत्सु भूजानिषु ।। ९१
अनभ्रमशनिध्वानैः सञ्जाता वृष्टिरद्भुता ।
पर्यवर्तत धात्री च समुद्रैरद्रिभिस्समम् ।। ९२
जय जय ध्वनिरन्यकृतो हरिं
भुवनवन्द्यममोघपराक्रमम् ।
प्रति नुतिप्रकरैर्महितात्मनां
दिव मवाप ततो बहुसंकुलः ।। ९३
सुखारंभं यागं हृतबहुलविघ्नं स कृतवान्
हरिश्चेदीशस्यालघुपटुशिरश्छेदविधिना ।
स यागो मिष्टान्नप्रचुरधनदानादिमहितः
समाप्तिं तत्कृष्णावनमधिगतः प्राप सुमहान् ।। ९४
देवब्राह्मणभूपदेशिकतते स्तृप्तेर्विधातुर्महा
यज्ञस्यावभृथाभिषेकविमलस्वांगस्य धर्माकृतेः ।
सत्कीर्तिच्छविशोभितस्य सदसि श्रीधर्मराजस्य ते
दृष्ट्वौन्नत्यममन्दहर्षभरिता आसन्नुपेन्द्रादयः ।। ९५
महाभूत्या युक्तं यमतनयमुद्दिश्य सकला
नृपाला ऊचुस्ते सुगुणगणयुक्ताह्यसदृशी ।
प्रवृत्तिर्धर्माढ्या सकलनृपवंशेषु धरणी
कुलं ह्याजामीढं नयति पृथुकीर्तिं नृपमणे ।। ९६
दृष्ट्वा त्वन्महनीययज्ञमनघं संप्राप्य ते सत्कृतिं

धन्त्यवं समवाप्नवाम सदयं गन्तुं स्वदेशान् प्रभो ।
आज्ञामर्हसि दातुमित्यभिमतामाज्ञामवाप्य स्वकान्
देशान् जग्मुरपूर्वगौरवदिशा संभाविताः पाण्डवैः ।। 97

गुणविशिष्ट महाधरणीसुरा
नृपसमर्पितभूरिधनान्विताः ।
प्रबलतृप्तियुता स्स्वगृहान्ययु
र्यमसुताय दिशन्त उयाशिषः ।। 98

पर्जन्यं भूतसंघा वा
पक्षिणः फलशाखिनम् ।
महेन्द्रमादितेया वा
बान्धवास्त्वां भजन्तु भोः ।। 99

अप्रमत्तः प्रजारक्षां
कर्तुमर्हसि भूपते ।
इत्युक्तिं वासुदेवस्य
श्रुत्वाऽवोचदिदं नृपः ।। 100

समाप्तिं निर्विघ्नं सवनमगमत्त्वत्करुणया
मयाप्तं सर्वोर्वीनृपवरमहीभृत्ततयशः ।
मदीयो वंशोयं निखिलसुगुणानां खनिरभूत
पवित्रश्चात्यन्तं सकलनृपवंशेषु धरणौ ।। 101

इतः परं प्राग्वदनन्त शौरे
कृपार्द्रदृष्ट्याऽर्हसि पातुमस्मान् ।
दूरस्थितोप्यार्य ! समीपवर्ती
त्वं नः प्रभो ! लोकहितैकबुद्धे ! 102

जवाश्वाकृष्टं स्वं वरकनकतार्क्ष्यध्वजयुतं
घनध्वानं दक्षं प्रचलितमरं दारुककरात् ।
प्रतस्थे स्वं गेहं मणिखचितरम्यं रथमसौ
समारूढः कृष्णो यमसुतमुखैस्तैरनुगतः ।। 103

इति शम्

कौशिकधर्मव्याधोपाख्यानम्

श्रीकारुण्याकरबुधविशिष्टाग्रहारे पुराऽभू
देको विप्रः प्रयतजननश्शस्तशीलो मनीषी ।
स्वेस्वाध्यायप्रवचनरतस्सत्तपोवित्तशोभी
भिक्षावृत्त्या प्रतिदिनमसौ स्वीयदेहं पुपोष ।। 1

तस्मिन्नेकदिने महीरुहतले ग्रामाद्बहिर्निष्ठया-
ऽधिष्ठायाऽऽसनमुत्तमं कुशमृगत्वग्धौतवस्त्रोत्तरम् ।
विप्रे कौशिकनामधेयविदिते वेदं पठत्यास्थया
शाखाग्रस्थवकेन तस्य शिरसि क्षिप्तं मलं दूषकम् ।। 2

तद्वृत्तनष्टनियमेऽमितकोपवह्नि
ज्वालाप्रदीप्तभयदाक्षियुगेन विप्रे ।
वीक्षां प्रकुर्वति महीरुहराजशाखा-
भ्रष्टो बकः क्षितितलेऽपतदाप्तमृत्युः ।। 3

वृत्तं विषादजनकं प्रसमीक्ष्य विप्रः
सन्तप्तहृद् बत! बको मम कोपवह्नेः ।
ज्वालाहुतिस्समजनि श्रुतिपाठिनो मे
धिग् जन्म निष्कृति महं कथमाचरेयम् ।। 4

एवं विचिन्त्य मनसि प्रबलेन दुःखे
नार्तः कृताह्निक विधिस्स चचार वीथीम् ।
माध्याह्निकातपरुजा परितप्त एकं
विप्रस्य गेहमगमत् क्षुधया प्रखिन्नः ।। 5

स्थित्वा तद्विप्रगेहस्य द्वारस्थ पुरतो द्विजः ।
भिक्षां देहीति वेश्मस्थां ययाचेऽन्नं स्त्रियं मुहुः ।। 6

श्रुत्वावाचमुदीरितां द्विजवरेणात्यन्तभक्त्यन्विता
साऽभूत्तद्गृहचन्द्रिका सुगृहिणी भिक्षाप्रदाने रता ।
एतस्मिन् समये गृहं गृहपतिश्श्रान्तो बुभुक्षान्वितः
स्वीयं प्राप तदीयसेवनरताऽभूत्तस्य दारा भृशम् ।। 7

दाराः पतिं क्षुधितमुत्कटभक्ति युक्ता
स्नातं विधाय रुचिरान्न मनेक शाकम् ।
तस्मै प्रदाय घृतसूपदधिप्रशस्तं
तत्पादपद्म युगसेवनमाचरत्सा ।। 8

भर्तुर्विधाय च सती प्रमुदोक्तसेवां
संस्मृत्य पूर्वमवनीसुरवर्ययाच्ञाम् ।
दृष्ट्वा गृहस्य पुरतः स्थितभूसुरं तं
भिक्षां गृहाण सदयं द्विज दीयमानाम् ।। 9

भर्तुर्गृहं गतवतोऽतिबुभुक्ष या मे
भोज्यादिदाननिरताऽभवमद्य यावत् ।
भिक्षाप्रदानविषयो गलितः स्मृते र्मे
कारुण्यसागर ! शमैकनिधान ! पूज्य! ।। 10

क्षन्तुं समर्हसि ममाग इति प्रभक्त्या
श्रुत्वा कृतां सुविनतिं गतसत्त्ववृत्तिः ।
क्रोधारुणेक्षणभयंकर एवमूचे
साध्वीं स तां निजधवस्य नियोगसक्ताम् ।। 11

किं ते धवो गुरुतरस्सुदति ! प्रपूज्याद्-
विद्वज्जनादुपगतात् क्षुधया गृहं ते ।

निस्सीमसम्पदधिकस्मयमत्तचित्ता
मन्दादरासि विषये मम भर्तृचित्ते ! ।। 12

सर्वं इन्द्रादयोऽमर्त्या निजमौलिमणित्विषा ।
नीराजयन्ति विप्रस्य पादावत्यन्तभक्तितः ।। 13

भूदेवा ये न्यक्कृतास्ते क्रुधाग्नि
ज्वालाजालैर्भस्मसात् कर्तुमीशाः ।
द्वीपैस्सर्वैस्सर्वभूमिं निमेषा
न्नोरोद्धुं तान् सृष्टिकर्ताऽपि शक्तः ।। 14

श्रुत्वेदं भयदं वचोऽवददसौ साध्वी द्विजं सत्कवे!
जानाम्येव गुरूपम द्विजवराऽसामान्यशक्तिं यथा ।
क्रोधेनैकधरामरोऽशपदपां राशिं त्वपेयोदकं
क्रुद्धो दण्डकदेशमन्यधरणीदेवो ददाहाखिलम् ।। 15

वातापिं जठरे सुजीर्णमकरोन्नैजे द्विजोऽन्यो महान्
विद्वन् ! ब्रह्मविदां महत्त्वमतुलं विप्रेश्वराणामहम् ।
नो जानामि कथं? शिरोग्निसहितेनेध्मेन मूर्खाप्यहं
कण्डूये न महीसुरेन्द्रचरणौ सेवे सदा भक्तितः ।। 16

वदामि वृत्तं विमलं मदीयं
पतिर्गतिर्मेऽखिलदेवतानाम् ।
उपास्यदेवोऽस्ति स एव मे त-
द्धितं सदाऽहं विदधामि भक्त्या ।। 17

बकः क्रुधग्नावभवद् द्विजेन्द्र !
प्रातर्हविस्ते विदितं मयेति ।
प्रभावहेतोः पतिभक्तिजातात्
क्रोधोऽतिनिन्द्यस्स सदा प्रवर्ज्यः ।। 18

क्रोधमोहसमाह्वौ द्वौ घोरशत्रू विपत्करौ ।
सर्वेषां, तावजित्वा नो विप्रो गौरवमर्हति ॥ 19

सत्यं योऽभिदधाति मानववरो हिंसातिदूरस्थितो,
यो व्यग्रो गुरुकार्य साधनविधौ यश्चेन्द्रियाणां जयी ।
यो धर्मावननिष्ठितोऽनवरतं यस्तुल्यदृक् प्राणिषु
क्रोधाद्यप्रहतः करोति विफलं कर्माणि यस्स द्विजः ॥ 20

पुण्यात्मायो द्वन्द्वमुक्तो गताघो
गीर्वाणाद्यातं द्विज ह्यामनन्ति ।
विप्रस्यार्थं ह्यार्जवं वेदपाठं
चित्तैकाग्र्यं कोविदा आमनन्ति ॥ 21

एते वेदनिरुक्तशस्तसुगुणा धर्मोऽतिसूक्ष्मो महान्
दृष्टो नैकविधेषु चाध्वसु भवान् स्वाध्यायसक्तस्सदा ।
नो जानात्यतिधर्मसूक्ष्मसरणिं गन्तुं त्वमर्हस्यतो
धर्मव्याधपुरं द्विजेन्द्र ! मिथिलानाम्ना प्रसिद्धिं गतम् ॥ 22

तस्यां पुर्यां विजितकरणस्सत्यवादी किरातो
मातापित्रोर्भजननिरतस्तत्त्ववित् पूतशीलः ।
सर्वान् धर्मानुपदिशति ते संशयान् स्वान्तसुस्थान्
दूरीकर्तुं स च सुकुशलो मे क्षमस्वापराधान् ॥ 23

साध्वीप्रोक्तां वाचमाकर्ण्य विप्र
स्तां प्रत्यूचे त्वं त्वनिन्द्यासि साध्वि !
त्वत्तः शान्तिं मानसं मेऽध्यगच्छत्
भूयात् संपत्ते शुभानामनन्ता ॥ 24

उक्त्वैवं स सुधीर्द्विजस्सविनयो भूत्वाऽभिवन्द्यादरात्
स्मारं स्मारमखण्डबोधमहितां तां भर्तृसेवारताम् ।

धर्मव्याधगुरोर्विलोकनरतः क्रान्त्वा नदीः पर्वतान्
ग्रामांस्तां नगरीमतीव रुचिरां प्राप प्रहर्षान्वितः ॥ 25

प्रविश्य मिथिलापुरं ह्यनुपमेयसम्पद्युतं
चतुष्पथगतैर्जनैर्विदितलुब्धकोदन्तकः ।
गृहस्य पुरतः स्थितं सहजवृत्तिसंव्यापृतं
ददर्श स किरातकं धरणिदेव औत्सुक्यतः ॥ 26

पिशितखण्डतप्तापणसुस्थितं
तरससंग्रहणेच्छुजनावृतम् ।
पललविक्रयकर्मसुनिष्ठितं
न सुमुखस्तमुपैतुमभूद् द्विजः ॥ 27

तिष्ठन्तं दूरतो व्याध उपगम्य स्वयं द्विजम् ।
तदागमनहेतुं स बुद्ध्वा सम्यग्गतस्मयः ॥ 28

नितान्तभक्तियुक्तस्तं प्रणम्यादरपूर्वकम् ।
पप्रच्छ कुशलं प्रीत्या वदति स्म स तं द्विजम् ॥ 29

पतिव्रतानिदेशतो मदन्तिकं द्विजाग्रणी–
र्दिदृक्षुरेव मां भवान् समागतोऽतिदूरतः ।
त्वदीयहृद्गतो मनोरथो ममास्ति निर्मलो
मुदा प्रजायते गृहं मम प्रवेष्टुमर्हति ॥ 30

इत्युक्त्वा तं ब्राह्मणं स्वीयगेहं
नीत्वा योग्ये विष्टरे चोपविष्टम् ।
कृत्वा तस्मै भक्तिपूर्वं समर्चां
धर्मव्याधस्सोऽकरोत् संविनीतः ॥ 31

पतिव्रताया वरबोधमादौ
व्याधस्य बोधं सपदि प्रतीतम् ।

विप्रः स सम्यक् परिचिन्त्य बुद्ध्या
सविस्मयोऽभूत्तमुवाच चैवम् ।। 32

त्वं धर्मवेत्तासि परं त्वदीया
वृत्तिर्मृगाणां हननेन निन्द्या ।
विचिन्त्य घोरं तव कर्म मेऽद्य
बुद्धिस्सदुःखा भवति प्रकामम् ।। 33

श्रुत्वेदं वचनं सम्यगप्रियं कोपकारणम् ।
शान्तचित्तोऽवदद् व्याधः प्रत्युक्ति तं द्विजं यथा ।। 34

अस्माकं पशुमांसजीवनमिदं धर्मः परः प्रोच्यते
धर्मो वंशपरम्परागत इति प्रोक्तोऽयमस्मज्जनैः ।
नो हिंसाऽत्र, नृपोऽनघोऽस्ति जनको देशस्य नः सर्वदा
यो जागर्ति समस्तवर्णनियमप्रत्येकसंरक्षणे ।। 35

आत्मकर्मपरित्यागं यः करोति तमात्मजम् ।
अपि दण्डयतीशोऽहं नालं त्यक्तुं कृतिं स्विकाम् ।। 36

नाहं हन्मि कदाप्यार्य ! जंतून् स्वयमुपागतम् ।
पिशितं हतजन्तूनां विक्रयं विदधाम्यहम् ।। 37

संपत्त्या विनयस्य देवनृपतीन् वृद्धान् गुरून् बान्धवान्
विप्रानर्थिजनान्यथाविधि बहून् संपूजयाम्यन्वहम् ।
सत्यं शौचदमौ त्यजामि न शमं मित्रेषु भृत्येष्वहं
भूयिष्ठं सदयो भवामि न कदाप्यात्मस्तवे तत्परः ।। 38

नासूयामि परेभ्य आदृतियुतोऽश्रान्तं व्रतान्याचरा-
म्यासक्तो नहि वित्तभोगविषये दारानृतौ याम्यहम् ।
तृष्णासंगविहीन आत्ममि समस्सर्वात्मना संस्तुतो
निन्दायामुपवासकर्मणि रतो निन्दामि नान्यान् जनान् ।। 39

अतो हीनजातिप्रसूतोऽपि सम्यग्
विशुद्धांन्तरंगोऽस्म्यहं ैव पापी ।
प्रसंगेन चोक्तं मया सर्वमेतत्
त्वमत्रागतोऽसि प्रबोधाय मत्तः ।। 40

धर्मस्य सावधानस्त्वं तत्त्वं श्रोतुं समर्हसि ।
यथाशक्त्यहमार्याग्र्य भवन्तं वेदयामि तत् ।। 41

चरेत्स्वधर्मं न कदापि तं त्यजेत्
परं स्वकीयात्मसमं विभायेत् ।
क्षमां दयामात्मनि न त्यजेत् बुध-
स्त्यजेत्समीहां विषमां स्रगादिषु ।। 42

त्यागतुल्यो गुणो ास्ति त्रिलोक्यामभ्यसेत्सदा ।
गुणं तं त्यागशीलस्य नास्त्यलभ्यः कृती जयः ।। 43

दुष्टोऽन्यार्थे कृतात्मीयपापेनैव सुदह्यते ।
यत्नेनापकृतिस्तस्य विषये नाचरेद् बुधः ।। 44

प्रांप्यं सत्यहितोक्तिकौशलमपि प्राज्ञस्य सेवा मता
क्रोधे सत्यपि वैर-कामजनिते क्षान्तिस्थितिः शस्यते ।
दैन्योल्लासवशंगतिस्समुचिता नों भीतिकाम्यार्थयो
र्न द्वेष्येऽप्यपकृद् भवेदिति हितं प्रोक्तं नृणां पंडितैः ।। 45

अपवदत्यपि नास्तिकदुर्जनो
निजकुलागतकृत्यमसूयया ।
विहितधर्मरतिं न परित्यजे-
दपि निजासुभये सति मानवः ।। 46

क्रोधलोभौ रिपू नृणां महानर्थंकरौ ध्रुवम् ।
यत्नेन यो जयत्येनौ स एवोत्तमभूसुरः ।। 47

शिष्टैरनादृता मार्गाः कूपा इव तृणावृताः ।
कपटैस्संवृता धर्मैर्धार्मिकस्तान् परित्यजेत् ।। 48

शिष्टाचारान्समादृत्य चरेत्तान् धार्मिकस्सदा ।
इत्युक्तः कौशिको व्याधमपृच्छच्छिष्टपद्धतिम् ।। 49

पृष्टो व्याध उवाच तं द्विजवरं श्रीकौशिकं सादरं
दानं सत्यवचस्तपश्च सवनं कौटिल्यदूरस्थितिः ।
कामादित्यजनं गुरूत्तमबुधोपस्थानमध्यात्मदृक्
स्वस्वाध्यायरतिर्दमश्च सुगुणाश्शिष्टादृताः केचन ।। 50

निर्दम्भत्वमदैन्यमास्तिकजनैस्संमिश्रणं नास्तिका–
संगो विश्रुतपूततीर्थगमनं शीलस्य संरक्षणम् ।
शौचं धर्मरतिर्हितोक्तिकथनं मित्रावनं सर्वदा
दाक्षिण्यं निखिलेऽपि भूतनिचयेऽहंकारसंशोषणम् ।। 51

धर्मा शिष्टादृता एते; शिष्टाचारसमुद्भवः ।
प्रमदो दुर्लभोऽन्येषु मार्गेषु चरतां नृणाम् ।। 52

शिष्टाचाराभिरत्या त्वं सेवां कुरु गुरोस्ततः ।
स्वीयाध्ययननिष्णातो ज्ञानपक्वेन चेतसा ।। 53

कामक्रोधादिभङ्गीभिर्विषयादिस्वरूपकैः ।
मकरादिभिराकीर्णं मोहाब्धिमतिदुस्तरम् ।। 54

तर्तुं यतस्व विप्र त्वं धर्मोडुपसहायतः ।
कृतार्थतामवाप्तुं चेत्युपदिश्यावदत्पुनः ।। 55

अहिंसां सर्वधर्माणामग्रस्थां सत्यशोभिनीम् ।
शिष्टधर्मेषु सत्यं च प्रशस्तं ब्रुवते बुधाः ।। 56

धर्मास्त्रिधा श्रुतिप्रोक्ताः शास्त्रोक्ताः शिष्टपूजिताः
त्रय एते प्रकल्पन्तेऽनुष्ठिताः श्रेयसे नृणाम् ।। 57

शिष्टाचाराननुसरति यो वेदवेदीप्रशस्तान्
पुण्यात्मा सोऽखिलसुविषमा दुर्गतीःस्वस्वथचित्तः ।
तीर्त्वोत्तुङ्गं रुचिरधिषणा हर्म्यमारूढ उच्चै
र्लोकान् दृष्टवा हसति बहुधाघोविपन्नान्नितान्तम् ।। 58

हिंसाजुष्टा तु मद्वृत्तिर्मांसविक्रयणादिना ।
इत्युक्ताभूत्त्वया तस्यास्तत्त्वं श्रृणु सविस्तरम् ।। 59

न कोऽपि शक्नुयाद्धिसारूपं निर्णेतुमात्मनः ।
कर्मणा भूतनाशः स्याद्धन्ता याति निमित्तताम् । 60

फलमूलौषधीः शाकान्यसृजच्चतुराननः ।
पशून् मृगांश्च भूतानां भक्ष्यत्वेनेति कोविदाः ।। 61

छित्वा गात्रं स्वकीयं शिबिनृपतिरदान्मांसमग्नीन्द्रयोः प्रा–
ग्रन्त्याख्यो ज्याधिनाथः प्रतिदिनमवधीद्गोसहस्त्रद्वयं सः ।
अब्दानां प्राक्सहस्त्रादवनिसुरवरा वेदविद्याप्रवीणाः
स्वाचारे सक्तचित्ता विहितपशुवधं ह्याचरन्नध्वरेषु ।। 62

एते सर्वे सद्गतिं प्राप्नुवन्तः
श्रौताग्निभ्यो रोचते मांसहव्यम् ।
शिष्टाचारा एत आम्नायमूलाः;
कः शक्तः स्याद्वेदितुं धर्मसौक्ष्म्यम् ।। 63

पितॄणां देवतानां च कार्ये मांससमर्पणम् ।
शिष्टानां कव्यहव्यादिशेषभक्षणमीहिते ।। 64

सीराग्रेणाचलां कर्षत्यनिशं हालिको, बहुः ।
प्राणिवर्गो हतस्तेन जनपद्भ्मां हतः स च ।। 65

तोयं पृथ्वी गगनमखिलं प्राणिसन्तानपूर्णं
हिंसावश्यं भवति सकलप्राणिनां नित्यकृत्ये ।
हिंसाशून्या न खलु भवति प्राणिनां देहयात्रा
साध्या; हिंसा नहि नहि कृतास्माभिरित्यत्र केचित् ॥ 66

अहिंसाव्रतिनोऽरण्ये वसन्तो मुनिपुङ्गवाः ।
स्वदेहपोषकार्यार्थं वृक्षमूलफलानि च ॥ 67

निपीडयन्ति शाकानि हिंसाग्रस्ता न ते किमु ?
हिंसातीतो जगत्यस्मिन्नेकोऽपि न हि दृश्यते ॥ 68

यथाशक्ति चरेद्दूरस्थितो हिंसाप्रवृत्तितः ।
जन; एतद्धि हिंसायास्तत्त्वमूचुः प्रवेदिनः ॥ 69

धर्मो बहुविधस्तस्य गतिः सूक्ष्मा न शक्यते ।
वेदितुं; सा च संग्राह्या ज्ञानवृद्धप्रवृत्तितः ॥ 75

भूतानां हितकृन्मृषोक्तिरपि संभाव्यामृषोक्त्या समा
भूतानां विपदां पदं यदुदितं सत्यं न धर्मः परः ।
प्राणापायविधौ विवाहविषये सत्योक्तिरप्यादृता
शिष्टैर्यद्वदृतोक्तिरीदृगुदिता सत्यस्य सूक्ष्मा गतिः ॥ 71

कुलाचारस्तु निन्द्यो वाऽनिन्द्यो वा नार्हति स्वकः ।
त्यागं; स स्वीयभाग्यत्वेनोद्धार्यः सर्वदा सताम् ॥ 72

अवश्यं फलमायाति पूर्वाचरितकर्मणः ।
असहिष्णुर्नरो दैवमनर्थे सति निन्दति ॥ 73

धर्मसक्तश्च नीतिज्ञः सयत्नोऽपि फलं व्रजेत् ।
नैव; विन्दति तत् क्रूरः पिशुनोऽयत्नतः पुमान् ॥ 74

निर्धना यान्ति सन्तानं नो यान्ति धनिनः सुतान् ।
चरित्वापि व्रतादीनि नात्मतन्त्रं फलं कृतेः ॥ 75

फलप्राप्तौ स्वयं कर्ता कार्यस्य यदि मानवः ।
प्राप्नोति न जयं सर्वकार्यजातेः स किं सदा ।। 76

देहोत्पत्तिः कर्ममूलैव विद्वन् कर्माधीना देहवृत्तिर्भवेच्च ।
देहापाये तद्गतो जीव एति स्थानं कर्माधीनमेवेति विज्ञाः ।। 77

श्रुत्वा धर्मव्याधबोधं स आर्यो विप्रः सम्यक्प्रीतचेतास्तमूचे ।
व्याधं धीरं कीदृशं जीवतत्त्वं श्रद्धालुं मां श्रावय त्वं तदार्य ।। 78

व्याधः श्रुत्वा प्रार्थनां कौशिकस्य प्रोवाचैवं जीवतत्त्वं मनीषिन् ।
जीवो नित्योऽकिल्बिषः स्वीयकर्मप्राप्तं देहं नश्यमभ्रष्ट एव ।। 79

त्यक्त्वा पश्चाद्देहमन्यं गृहीत्वा कर्माधीनः सञ्चरन्निर्विरामम्–
कष्टं सौख्यं प्राप्य देहात्स्वकीयाद्देहं चान्यं प्राप्नुवन् वर्तते सः ।। 80

निशम्येदं वचो व्याधात्तमपृच्छदिदं द्विजः ।
पापपुण्यफलप्राप्तदेहबन्धास्तु कीदृशाः ।। 81

स्थिरपुण्यकृतेर्भवत्यमर्त्यो मनुजः संभवतीह मिश्रणात् ।
सुकृतस्य, महोग्रकिल्बिषात्स्वात्पशुकीटाः प्रभवन्ति सर्वदा ।। 82

जीव एवं जनिं प्राप्य मृतो जन्म पुनर्व्रजेत् ।
न कदाप्येति संसारसिन्धुपारं स्वदुष्कृतेः ।। 83

पृष्टवा सर्वं संसृतेर्वृत्तमीदृक्त्यक्त्वा पापस्यायनं धर्ममार्गम्–
श्रित्वा, हित्वाऽहंकृतिं मत्सरं स्वं शस्ता धर्म्याः सत्क्रिया आचरेत् सः ।।84

कृत्वा धर्मैश्चित्तनैर्मल्यमाप्त्वा ज्ञात्वा सम्यक्चेन्द्रियार्थस्य नाशम् ।
भूत्वा पक्वः सत्यनिष्ठातपोभ्यां धीरो विन्दत्यात्मतत्त्वप्रकाशम् ।। 85

आत्मज्ञानी सदा भाति भूत्वा ब्रह्मैव केवलम् ।
श्रुत्वैवं व्याधतोऽपृच्छद्द्विजस्तमिति तत्परः ।। 86

कानीन्द्रियाणि तेषां चानिग्रहात् पापमुद्भवेत् ।
कीदृशं; निग्रहीतुश्च करणानां फलं किमु ॥ 87

सर्वं मे विस्तराद्ब्रूहि शुश्रूषा मम वर्तते ।
इत्युक्तो लुब्धकोऽवोचद्द्विजमत्यादरान्वितः ॥ 88

मनोऽस्ति मूलं विषयावबोधने स्वेच्छाप्रवृत्त्यार्जितनैजशक्त्या ।
तदिन्द्रियार्थाभिरतं विधत्ते पुमांसमित्युक्तमुदात्तयोगिभिः ॥ 89

इन्द्रियार्थवशगः पुरुषःस्याद्गाढरागमलिनीकृतचित्तः ।
रागतःस गुरुलोभविधेयो घातुकश्च विनयेन विना स्यात् ॥ 90

पापकृद्बहुलतोऽकृतपुण्यः सज्जनोक्तहितमादृतिहीनः ।
नावधारयति, दुर्जनसख्यं कांक्षयन् करणसाम्यमपैति ॥ 91

लोकेंऽस्मिन् पुण्यहीनो यः परस्मिन् बहु दुःखभाक् ।
अतस्त्यक्त्वेन्द्रियादीनां वशं तादृशमानवः ॥ 92

साधुसंगतिमाश्रित्य सुगतिं विन्दति ध्रुवम् ।
इत्युक्त्वा ब्रह्मवित्कृत्यं सम्यक् सोऽश्रावयद्द्विजम् ॥ 93

आकाशवाय्वग्निजलानि भूमिर्भूतानि पञ्चेति वदन्ति; शब्दः ।
स्पर्शश्च रूपं रसगन्धयुग्मं गुणा मता भूतकपञ्चकस्य ॥ 94

आकाशमुख्यानि च पञ्चभूतान्युत्पत्तिमाप्तान्यनुलोमगत्या ।
कालक्रमेण प्रलले श्रयन्त एकैकशो हि प्रतिलोमगत्या ॥ 95

पञ्चेन्द्रियाणि चर्माक्षि श्रोत्रजिह्वं च नासिका ।
शब्दस्पर्शौ रूपरसगन्धा इन्द्रियगोचराः ॥ 96

षष्ठं हृत्करणं बुद्धिः सप्तमं ह्यष्टमं स्मृतम् ।
हअकृतिस्तमः सत्त्वं रज एते गुणास्त्रयः ॥ 97

प्रपंचश्च महाभूतप्रमुखो निखिलः क्रमात् ।
आविर्भावतिरोभावावव्यक्ते यान्ति सन्ततम् ॥ 98

शब्दादिविषयासक्त्या यथेच्छं विषयादिषु ।
इन्द्रियाणि प्रवृत्तानि बुधः स्वीयवशं नयेत् ॥ 99

धीरः संयमितेन्द्रियो नरवरः स्वं सर्वभूतस्थितं
भूतेष्वन्तरितात्मदर्शनतया दृष्ट्वा स्वकीयात्मनि ।
सर्वा भूततर्ति प्रपश्यति तथा व्यग्रस्तपःसंयमे
तिष्ठत्यात्मविलोकनेऽभिरतिमानात्यन्यनाशे परे ॥ 100

समस्तविषयापेतं बुद्धिवैभवमुच्यते ।
तपो नाम; किमस्तीह कर्तव्यं विदितात्मनः ॥ 101

स्वर्गं नरकमाप्नोति स्वेच्छासञ्चारिणां सदा ।
इन्द्रियाणां निरोधेनानिरोधेन च मानवः ॥ 102

देहो रथोऽश्वाः सकलेन्द्रियाणि
स्वात्मैव सूतस्तुरगानदम्यान् ।
धैर्यैकरश्मिप्रकरेण धीरो नियम्य
भद्रां गतिमेति नित्याम् ॥ 103

पञ्चेन्द्रियाणि च मनः स्ववशे स्थितानि
मर्त्यस्य यस्य परमस्य स एव सम्यक् ।
ध्याने समाध्यधिगमे नितरां समर्थः
शंसन्ति तं मुनिवरा अमरा अशेषाः ॥ 104

तमोऽतिनिन्दितं सत्त्वमतिबोधमयं तथा ।
प्रकशतातिरुचिरं रजस्तूभयमिश्रितम् ॥ 105

निद्रादैन्यसुमोहतामसिकताः क्षान्तेरभावस्तथा
लोभो रागजडत्वकार्यपरताः प्रोक्ता रजोवृत्तयः ।

धैर्यं शान्तिघृणे प्रमोदनिरतिः सत्सङ्गतिश्चार्जवं
स्वात्मानात्मविचारसक्तिरुदिता विद्यागुणा उत्तमाः ॥ 106

सत्त्वस्थैर्यविराजितो बुधवरो बोधेन सर्वैहिकं
वृत्तं तुच्छमनित्यमित्युपरतो मोहात्त्यजन् कामनाम् ।
स्त्रीवित्तादिषु संयमेन ममताहङ्कारदूरस्थितो
नित्यां शान्तिमवाप्य संसृतिपथं त्यक्त्वाऽऽनुयाद्धन्यताम् ॥ 107

विशुद्धसत्त्वर्धिविराजितो नरो
भवेत्सुवैश्यो जननान्तरे स्वके ।
क्रमात्स भूपावनिदेवमूर्तिमा
न्भवाब्धिमुत्तीर्थतां कृतार्थतां व्रजेत् ॥ 108

निपीय कर्णाञ्जलिसम्पुटैर्द्विजः
सुधामयोक्तीर्गलिता मुखाम्बुजात् ।
स लुब्धकस्योत्तमधर्मवेदिनः
श्रद्धायुतस्तं पुनरुक्तवानिदम् ॥ 109

शुश्रूषा वर्तते जीववृत्तं श्रावय मां यतः ।
वाच्यं श्रद्धासमेतस्य पृच्छतश्च विशेषतः ॥ 110

प्राणापानयुतः सर्वदेहेषु प्राणिनां सदा ।
वर्तते योऽनलो जीवः स इति ज्ञायते बुधैः ॥ 111

वसन्नपि स देहेषु सर्वेषु न हि लिप्यते ।
पुण्यपापैर्यथाऽम्भोजपत्रं नो लिप्यतेऽम्बुना ॥ 112

चैतन्यरहितं क्षेत्रं सचैतन्यं करोति यः ।
परात्मा यः सुविख्यातस्त्रैलोक्यस्य विधायकः ॥ 113

कुशाग्रबुद्धयो बोधसाह्येनात्मविदो बुधाः ।
नित्यज्योतिर्मयं भूतात्मानं तं कथयन्ति ते ॥ 114

उक्तैवं लुब्धको भूयो ब्रह्मविद्याप्रवेदिनः ।
उदात्तवृत्तमुद्दिश्य द्विजमित्थमुवाच तम् ॥ 115

ज्ञानयुक्ताय धीराय न रोचेते शुभाशुभे ।
कर्मणी; द्वन्द्वयोस्तस्य समता वर्तते स्थिरा ॥ 116

युक्ताहारविहाराभ्यां जित्वा स्वेन्द्रियपञ्चकम् ।
पूर्वरात्रेऽपरे रात्र्या योगव्यग्रो भवेद्बुधः ॥ 117

पश्यन्नात्मनि चात्मानं बोधदीप्तः सुनिश्चलः ।
निवातदीपवत्प्राप्नोत्यमृतत्त्वमयं बुधः ॥ 118

कामक्रोधौ त्यजन् कुर्वन्नापेक्ष्य तत्फलम् ।
लौल्येन यो विहीनः स ज्ञानी द्विज इतीर्यते ॥ 119

ज्ञात्वा जीवितमात्मनोऽस्थिरमिति द्वेषं त्यजन् प्राणिषु
प्रीतिं तेषु विधाय नित्यनिरतः सत्ये शमे ब्रह्मणि ।
कारुण्ये च परिग्रहानभिरतः सक्तः समाधौ भवे-
द्यो विप्रः स सनातनस्थितियुतो राराज्यते सर्वशः ॥ 120

अश्रावयंस्त्वां द्विज धर्मतत्त्वं
त्वमीहसे किं श्रवणं विधातुम् ।
स उक्त एवं द्विजवर्य ऊचे
त्वत्तोऽमश्रौषमशेषधर्मान् ॥ 121

प्रबुद्धोऽहं कृतार्थोऽहं त्वत्कृपावशतः कवे ।
सर्वज्ञस्त्वमिति ज्ञातं मयाऽद्य नितरां स्फुटम् ॥ 122

इत्युक्तो ब्राह्मणेनासौ व्याधः प्रोवाच तं द्विजम् ।
द्विजवर्य मया प्राप्तज्ञानसम्पत्तिकारणम् ॥ 123

एकमस्ति तदद्याहं प्रत्यक्षं दर्शयामि ते ।
गेहस्यान्तः प्रवेष्टुं मे प्रसीद त्वं बुधाग्रणीः ॥ 124

उक्तैवं स च लुब्धको द्विजवरं नीत्वा गृहाभ्यन्तरं
तत्रापूर्वसुगन्धवासिततले दिव्यासनस्थौ स्वकौ ।
इष्टाहारसुपोषितौ सुमहितैर्वस्त्रादिभिर्भूषितौ
तस्मै दर्शयति स्म नैजजननीतातौ प्रवृद्धौ मुदा ॥ 125

विनयेन नताङ्गः स व्याधस्तौ प्रेमपूर्वकम् ।
पप्रच्छ कुशलं तौ चावदतां स्वसुतं प्रियम् ॥ 126

वत्स त्वादृशधर्मपालनरते पुत्रेऽस्मदीये कुतो-
ऽपेक्षा त्वत्कृतधर्मरक्षणमलं संरक्षितुं नः शुचः ।
भूयासुस्तव दीर्घमायुरखिलाः सम्पत्तयो निस्तुला
युष्मच्छुद्धचरित्रपावित इहास्मद्वंश एवाखिलः ॥ 127

कुतो मर्त्यदेहस्त्वयात्तो न विद्व-
स्त्वमेवासि सत्यं परा देवता त्वम् ।
मनोवाक्क्रियाभिर्नियोगं स्वपित्रो-
श्चरस्यत्र सन्देहलेशोऽपि नास्ते ॥ 128

न कोऽप्यस्ति तुल्यस्त्वया जामदग्न्यं
विनेत्यूचतुस्तावतिप्रेमपूर्णौ ।
द्विजेन्द्रं प्रदर्श्यावदत्सूनुरेवं
स्वतातं प्रसूं भक्तिपूर्वं विनीतः ॥ 129

समागतोऽयं प्रसमीक्षितुं नः
प्रेम्णेति वाक्यं गदितं निशम्य ।
तमर्हरीत्याऽऽर्चयतां स तातो
माता च; जग्राह स तत्समर्चाम् ॥ 130

विप्राग्रणीर्मम पिता जननी च वृद्धा-
वेतौ समर्च्य विधिनाहमतीव भक्त्या ।

रम्यैः सुमैः फलवरैश्च सुधूपदीपै-
र्वस्त्रैरनेकरुचिरान्नमुखैश्च भक्ष्यैः । 131

दिव्यं प्रबोधमगमं न परः पितृभ्यां
देवोऽस्ति मेऽन्यमनुजा बहवोऽप्यमर्त्यान् ।
संपूजयन्ति; विबुधाः श्रुतयो व्रतानि
सर्वं मदीयपितराविति निश्चयो मे ॥ 132

माता तातः सद्गुरुर्वह्निरात्मा पञ्चैवैता देवताः सुप्रसिद्धाः ।
सद्गत्यर्थावाप्तये प्रीणयेत्ता यस्तं विज्ञा धर्ममूर्तिं ब्रुवन्ति ॥ 133

पतिव्रताऽऽज्ञयाऽऽगतस्त्वमार्य मेऽन्तिकं कवे
मयोपदिष्ट एव तेऽल्पशोऽद्य धर्मसंग्रहः ।
प्रसादतस्तदुत्तमस्त्रियाः परं मनो मम
त्वया न तृप्तमेव दुष्कृतिस्त्वया कृता पुरा ॥ 134

त्वदेकपुत्रौ पितरौ सुदुर्बलौ जिजीविषू त्वत्कृतसाह्यमूलतः ।
सहायहीनौ नितरां जरातुरौ दुरन्तचिन्तातिशयेन विह्वलौ ॥ 135

विनष्टदृष्टी त्वमतीव निर्दयं
त्यजन् सदा स्वाध्ययनप्रसक्तहृत् ।
कथं तदाज्ञामनवाप्य मां गतो
द्विजाग्र्य गर्ह्यं तव वृत्तमीदृशम् ॥ 136

त्वदीयवेदाध्ययनं त्वदीयसत्तपः प्रयत्नः सुकृतार्जने महान् ।
प्रपूज्य पित्रोः परिसेवनं त्वया क्रियेत चेन्नो सकलं हि निष्फलम् ॥ 137

व्याधेनैवं प्रोक्तवाचं निशम्य प्रोवाचैवं विप्रवर्यस्त्वयोक्तम् ।
सत्यं सर्वं सर्वशक्त्या करिष्ये सेवां पित्रोस्तद्धितं चाचरेयम् ॥ 138

मदीयपुण्यातिशयेन सख्यं-
त्वया महात्मन् महात्मन् जनितं नितान्तम् ।
प्रहृष्टचित्तोऽस्मि समस्तबोधो-
दयान्वितोऽस्म्यद्य दयाम्बुराशे ।। 139

पापोत्पन्नानन्तदौर्गत्यवह्निज्वालातप्तं मां प्रबोधामृतस्य ।
धारापातैः सन्ततैः स्वैः प्रशान्तं कृत्वाऽऽरक्षः सद्गुरो बोधमूर्ते ।। 140

धर्मः शस्तो भवति सुलभो नापि विज्ञानमूर्ते-
र्धर्मासक्तो न भवति बुधः प्राप्य एकोऽपि लोके ।
यो धर्मस्याचरणचतुरो धर्ममर्मप्रवेदी
नो लभ्योऽस्मिन् जगति स बुधो यस्तुलां ते बिभर्ति ।। 141

धर्मव्याधो द्विजवरवचः सम्यगाकर्ण्य भूयः
प्रोवाचैवं श्रृणु मम कथां पूर्वजन्मप्रवृत्ताम् ।
विप्रश्रेष्ठो विमलचरितो वेदवेदाङ्गवेदी
प्रेयोमित्रं समभवमहं कस्यचिद्राजसूनोः ।। 142

अभ्यस्तशरविद्योऽहं सह मित्रेण कानने ।
अमुञ्चं बाणमाकर्णाकृष्टं कृत्वा प्रयत्नतः ।। 143

विद्धः कश्चिन्मुनिरथ मया मुक्तबाणेन तीव्रं
वीरुद्धासान्तरिततनुमान् हा हतोऽस्मीति सद्यः ।
रक्तस्रावः समपतदसौ भूमिभागेऽसहायः
संक्रुद्धोऽभूद्गतवति मयि प्रेक्षितुं तं सदुःखे ।। 144

प्रोवाचैवं द्विजवरसुतोऽप्यद्य सम्यक् प्रवृत्तः
रौद्रे कर्मण्यत इह मृगव्याधजन्माप्नुयास्त्वम् ।
एवं शप्तश्चरणपतितः प्रार्थनां तं ह्यकार्षं
क्षन्तव्योऽहं, कृतमघमिति ज्ञानपूर्वं मया नो ।। 145

शापं घोरं भयदमधमं संहर स्वीयशक्ते–
रार्तत्राणाधिकरतमुने त्राहि मामित्यवश्यम् ।
श्रुत्वानल्पं रुदितमवदच्छापवाक्यं मदीयं
मोघं न स्याद्धृततनुरपि व्याधरूपेण पश्चात् ।। 146

सेविष्यसे स्वकं धर्मं भक्त्या सक्त्या त्वदीयकौ ।
पितरौ च शुभं भूयात्तवानन्तसुखाप्तितः ।। 147

प्रसूजनयितारौ त्वं सुसेव्याखण्डभक्तितः ।
शाश्वतं निस्तुलामोघदिशा प्राप्स्यसि सद्यशः ।। 148

शुश्रूषया तव पितुर्महनीयमातु-
र्जातिस्मृतिस्तव भवेज्जननान्तरे भोः ।
पश्चात् सुविन्दसि तनुं द्विजसन्तताावि–
त्यन्वग्रहीन्मुनिवरः स दयाकरो माम् ।। 149

कृतज्ञतापुरःसरं शरं तदीयदेहगं
समुद्धृतं विधाय मे क्षतं तमुत्तमं मुनिम् ।
भियानयं तमाश्रमं तदीयमार्तिदूरगो
मदीयपुण्यपाकतः स चित्तनिर्वृतिं ययौ ।। 150

द्विजेन्द्र जीविताावधौ गते समाप्तिमर्थव–
न्मुनीन्द्रशापकारणादहं गतोऽस्मि चेदृशम् ।
जनुर्महात्मनां वचोऽन्यथा भवेत्कदापि नो
कवीन्द्र वृत्तमीदृशं ममास्ति पूर्वजन्मनः ।। 151

इमां निशम्य लुब्धकप्रवृत्तिमादराद्द्विजः
प्रभवितोऽवदद्बुध त्वदीय उद्भवोऽसमः ।
न कुत्र दृश्यतेऽद्भुतावहा कथा धरातले-
ऽपरा त्वदीयजन्मना समानतां बिभर्ति या ।। 152

यः पापवर्तनयुतः स धरामरोऽपि
शूद्रादपि प्रबलगर्ह्यतरोऽस्ति सत्यम् ।
शूद्रोऽपि यः शमदमादिगुणाञ्चितस्तं
धीरा ब्रुवन्ति धरणीसुरमुत्तमं ते ॥ 153

प्रगर्ह्यकर्मणा नीचजन्माहं प्राप्तवानिति ।
मा शुचः प्रयतस्वान्तो धर्ममाचर यत्नतः ॥ 154

आयाति पूर्वजननार्जितकर्मपाका-
त्कष्टं च सौख्यमवनौ, परतत्त्ववेत्ता ।
तुल्यप्रवृत्तिसहितात्मविराजमानः
कष्टार्दितोऽपि न चलत्यतिधीरवृत्तेः ॥ 155

पिबन्त औषधान्यलं समाचरन्त आत्मनः
सुकर्मधर्मसञ्चयं शरीरमानसस्थिताम् ।
रुजं निवारयन्ति सज्जनाः समानबुद्धितो
विलोक्य सत्त्ववृत्तितः सुखं च दुःखमैहिकम् ॥ 156

अनुशोचन्ति विद्वांसो न कदाप्यागतापदम् ।
सुखदुःखे समे कृत्वा वर्तन्ते ते सुखान्विताः ॥ 157

हित्वा शोकं सुधीः सम्यगुद्योगं कुरुतेऽन्वहम् ।
भूतानां सदसद्रीतीर्ज्ञात्वा धैर्येण सञ्चरन् ॥ 158

पुण्यात्मासि कृतार्थतां च नितरां प्राप्तोऽसि धर्मं कुरु
त्वं नित्यं सुदृढं प्रमादरहितः शोभस्व सन्मङ्गलैः ।
युष्मत्संगतितोऽहमद्य गतवान् धर्मस्य बोधं परं
श्रीमन् मामनुमन्तुमर्हसि गृहं गन्तुं मदीयं द्रुतम् ॥ 159

संप्रार्थ्यैवं व्याधमत्यन्तभक्त्या
साष्टाङ्गं तं संप्रणम्य प्रपत्त्या ।
गेहं प्राप्य स्वं द्विजः शुद्धवृत्तो
मातापित्रोः सेवया धन्य आसीत् ॥ 160

श्रीकृष्णदौत्यम्

श्रीकृष्णं सर्वलोकानामाराध्यं करुणाकरम् ।
भक्ताभीष्टप्रदं दुष्टशासकं श्रीधवं भजे ॥ 1

आपृच्छ्य स्वान् सञ्जये निर्गते श्री-
धर्माकारो धर्मराजः समस्तान् ।
आनाय्य स्वान् सोदरानात्मसूनून्
बन्धून् भृत्यान् संसदीत्यभ्यवोचत् ॥ 2

हरेः सद्म गत्वा स नः प्रार्थनीयः प्रभो कौरवाणां सभां शीघ्रगामी ।
विवादं परिष्कर्तुमर्हस्यभीष्टं विना घोरयुद्धं विधायार्य सन्धिम् ॥ 3

उक्त्वैवं यमनन्दनो हरिगृहं गत्वार्हपूजां गतः
सर्वैः स्वैः परिवेष्टितो हितजनैर्मित्रैस्तथा पार्श्वयोः ।
द्रौपद्यां च तदीयसेवकजनैः संवेष्टितायां, क्वचित्
श्रीकृष्णेन समं सुखासनगतोऽवोचत्तमेवं वचः ॥ 4

सन्मित्रार्थं संविधातुं तवाद्य प्राप्तुं भागं चास्मदीयं द्रुतं नः ।
त्यक्त्वा युद्धं दुष्टदुर्योधनाद्यैः क्रूरैर्योग्यः काल आयात इष्टः ॥ 5

प्रद्युम्नादिसुतैर्वयं तु सदृशा सद्धर्ममार्गे स्थिता-
नस्मान् संविदधत्त्वमेधितदयः पातुं प्रसीद प्रभो ।
इत्युक्तिं यमनन्दनस्य सदयं श्रुत्वावदत् सो हरिः
कृत्यं यत्करवाणि तत्तव हितं यत्तद्वदाद्याशु माम् ॥ 6

श्रुतहरिवचनः स धर्मजस्तमुवाचास्मदनिन्द्यवर्तनम् ।
करिपत्तनमेत्य धार्तराष्ट्रानभिभाष्योचितवर्त्म निश्चिनु ॥ 7

अस्मत्तातस्य भावस्तनयहृदिगतस्तस्यभावश्च तेऽभूत्
सुस्पष्टं सर्वमेतत्करबदरसमं सञ्जयस्योक्तितः प्राक् ।
भागं ते नैव यच्छन्त्यपि च मृदुवचोविस्तरैश्चित्तवृत्ती–
रस्माकं प्रीणयन्तः कुरुपतितनया यापयन्त्येव कालम् ।। 8

दुष्करत्रयोदशाब्दसंगरस्य पालनं
संविधाय सर्वदुःखदुर्भरं वयं स्थिताः ।
वंशगौरवं स वृद्धभूपतिस्तु रक्षितुं
नेच्छति स्वदुष्टपुत्रवर्तनं निर्वतितुम् ।। 9

अखिला वयमत्युदात्तया विधया संमिलिताः सुखं गताः ।
जननीं च समस्तबान्धवान् परितुष्टान् विरचय्य वर्तनम् ।। 10

सर्वोत्तमं भवत्येव नोचेद्भव्यं तु जीवितम् ।
धिगस्माकमतः सन्धिं विधातुं त्वं यतस्व भोः ।। 11

सबन्धौ त्वयि साश्चर्यं श्रृण्वति ग्रामपञ्चकम् ।
दीयते यदि तृप्ताःस्म इत्यव्याजं मयोदितम् ,। 12

तावन्मात्रं हन्त दुर्योधनो नो
किं स्यात् शक्तो दातुमत्यन्तबाधा ।
दारिद्र्यात्स्वाद्दुस्सहा बान्धवानां
श्रेयोमूलं सख्यवृत्तिस्तु नः स्यात् ।। 13

अन्ये वा स्युः कौरवा वैरिणो वा
किं घातः प्राग्वाच्छनीयो वृथा नः ।
अन्यो मार्गः किं न कौरव्यपार्श्वे
बन्धुव्राताः सन्त्यहिंसावलम्ब्या ।। 14

क्लेशैः साध्यः क्षत्रधर्मोऽस्ति लोके धर्मोऽन्येषां नानुसर्तव्य एव ।
तस्माच्छस्त्रैर्जीविके वास्ति योग्या वंशोच्छेदो नैव युक्तो मुरारे ।।15

युद्धं लक्ष्म्याः प्राप्तये कल्पते स्वप्राणापायावाप्तये जायते तत् ।
एको योद्धा हन्त्यनेकान् व्रजन्ति श्रेष्ठा वीराः खण्डनं चाल्पयोधैः ।। 16

निश्चेतुं नैव शक्यौ स्तः संख्ये जयपराजयौ ।
जयोऽपि मरणाद्भूयश्चित्तदाहाय कल्पते ।। 17

यद्यप्यवश्यं कथमप्यरीणां साध्यो विनाशो बलसाह्यतः स्यात् ।
युद्धातिरिक्तालघु साधनेन प्राज्ञस्य राज्ञोऽस्ति जयः सुसाधः ।। 18

सर्पे स्थिते यद्वदनन्तभीत्या गृहे निवासो विपदः पदं स्यात् ।
तद्वद्विरोधे सति जीवितं स्यादतो न कार्यामितवैरवृत्तिः ।। 19

श्रेयोमूलं द्वेषनिर्मूलनं स्याद्वैराद्वैरं नैव शाम्येत् कदापि ।
मूलच्छेदो वैरिणां क्रौर्यसाध्यस्तस्माद्वैरं सर्वथा त्याज्यमास्ते ।। 20

तस्माच्छान्तिस्थापनं ह्यस्मदीयो ध्येयो मार्गः श्रीस्तु काम्या न वैरम् ।
घोरं प्राणानन्तवित्तप्रणाशं जन्यं हित्वा भिन्नवर्त्म श्रयामः ।। 21

त्याज्योऽवश्यं पक्षपातोऽस्मदीयो धर्मो नीतिः स्वस्थता भाग्यवृत्तिः ।
पक्षद्वन्द्वे स्युर्यथा त्वं तथा भो योग्यं रूक्षं निर्मलं भाषमाणः ।। 22

विदुरप्रभृतीन् प्राज्ञान् प्रत्ययेन सुसंगतान् ।
संविधायाद्भुतामोघवचा भूत्वा जयी भव ।। 23

त्यक्तन्यायः कुरुकुलपतिः क्रूरसंलापवर्ती
त्वं चेच्छान्तो भव; हितकरालाभवैमुख्यभाक् सः ।
ज्येष्ठो भ्राता कुरुजनपतेरात्मजानां वयं तु
श्रुत्वा वाक्यं शिरसि वहने तेऽत्र सिद्धा इति त्वम् ।। 24

सम्यङ् निरूप्य सदसि श्रुतपुत्रवाक्यो
वृद्धो यदि प्रकटयत्यविनीतिमुग्राम् ।

सन्धिर्न साध्य इति निश्चिनु नो द्रुतं त्वं
तन्निश्चये व्रज मतिं सुधियां समित्याम् ।। 25

चक्रिन् सम्यङ्ङैकचिन्ताप्रभिन्न
स्वान्तान् खिन्नान् पालयास्मान् विपन्नान् ।
शास्तास्माकं नास्ति कोऽपि त्वदन्य-
स्त्वन्नेतृत्वं स्यात्प्रियं सर्वथा नः ।। 26

दुर्योधनस्तु न कदापि तवाभिगम्य
इत्येकभाव उदितोऽद्य मदीयचित्ते ।
श्रोष्यत्यसौ हितवचो गुरुकार्यपूर्णं
नैवेति ते मम मतिस्ततराज्यकाङ्क्षः ।। 27

नेच्छामि त्वं प्रेषितुं संन्निधिं तद्दुर्वृत्तीनां क्रूरचित्तस्थितीनाम् ।
गान्धाराणां रोचते नापि मह्यं राज्यं दिव्यं यत्तवक्लेशमूलम् ।। 28

श्रुत्वा धर्मजवाक्यमेवमवदत्कृष्णोऽतिवृद्धो नृप-
स्तादृक्किं पुनरस्य सोऽग्रिमसुतः सत्यं वचस्तावकम् ।
जाने तावकभावमात्मनिहितानर्थस्य शंकां त्यजे-
र्भीत्यालं मयि कोपभाजि समरे प्रत्यर्थियोद्धा कुतः ।। 29

त्वत्प्रेषितोऽहं कुरुराजगोष्ठीं गत्वा यते त्वद्गुरुकार्यसिद्ध्यै ।
एनोनिवृत्तेरपि साधनं त्वद्भ्राविप्रवृत्तेरपि मे कृतिः स्यात् ।। 30

गान्धारवाचां यदि नानुकूल्यमित्युक्तिमार्यस्य हरेर्निशम्य ।
धर्मात्मजस्तं वदति स्म सन्धिमिति व्यवस्थापय सर्वशक्त्या ।। 31

जानास्यस्मान् कौरवानप्यशेषाञ्जानास्यर्थावाप्तिसंधानतत्त्वम् ।
जानास्येव प्रौढवाग्वादरीतिं कोऽहं त्वां भोः शासितुं राजनीतिम् ।। 32

अश्रौषं संजयोक्तं तव वचनततिं धर्मनिष्ठामतिस्ते
ते वैरं न त्यजेयुः परिगणनधिया भीष्मसाह्यस्य सम्यक् ।

द्रोणस्याप्याजिशक्तेरमितमदयुता नोचिता याचना स्यात्
क्षत्राणां भुक्तराज्या न जहति शकलं सामवाक्यैर्विनाजिम् ।। 33

न भीता धार्तराष्ट्रास्तेऽधर्मादप्यपकीर्तितः ।
त्यज दैन्यं जयाच्छत्रोर्विन्द राज्यं धनं यशः ।। 34

पश्यत्सु भीष्मादिषु पूर्वमुद्धताः
समाचरंस्तेऽपकृतिं दुरायतिम् ।
न दृश्यते तेष्वनुतापसंस्कृतिर्न
सांप्रतं तेषु तवादृतिः कृपा ।। 35

व्याजात्कृत्रिमदेवनस्य भवतां निर्वासनान्ह्यप्रिया
या वाचः परुषा बभूवुरुदिता दुर्योधनाद्यैः पुरा ।
ता वाच्या न भवन्ति तच्छ्रवणतो गोष्ठयां स्थिताः कोविदा–
स्तान् वृद्धं कुरुराजमुत्कटरुषानिन्दंस्तदैवाखिलाः ।। 36

दृष्ट्वा वः सुजनान् महाबलयुतान्निर्वासितान् स्थानतः
सत्यस्थैर्यविपक्षकर्मविमुखानाश्चर्यदुःखान्विताः ।
सर्वे, ये बहुनिन्द्यकर्मनिरता देवेन ते संहृता–
स्तादृग्दुर्जनमारणं सुसुखं साध्यं भवेत्सर्वदा ।। 37

क्रूरात्मानः कौरवाः सर्ववध्याः किं नो वध्यास्ते भवन्त्युग्रकृत्याः ।
पापाचारा हिंस्रका निर्विचारं वध्या एव श्रेयसे पन्नगा वा ।। 38

युष्मत्तातो देशिको भीष्मनामा
वन्द्यो श्रद्धाभक्तिपूर्वं ममार्यौ ।
तावभ्येत्य त्वद्विनीतत्वभक्ती
त्वत्पावित्र्यं सत्यरक्षातिनिष्ठाम् ।। 39

त्वत्सौजन्यं धर्ममार्गैकदृष्टिं
गोष्ठ्यां तत्राशेषभूपांश्च बन्धून् ।

मित्राण्यन्यान् कौरवांस्तान् प्रभूत–
स्प्रष्टैर्वाक्यैर्वेदयेयं स्वशक्त्या ।। 40

श्रुत्वा सर्वं मामकं वाक्प्रसङ्गं नाङ्गीकृत्यौचित्यहीनप्रसङ्गान् ।
कुर्वीत श्रीवृद्धभूपो न शक्तः स्याच्चेत् सर्वांस्तान्नियन्तुं स्वपुत्रान् ।। 41

निन्द्याः स्युस्ते; सर्वशक्त्याहमाजिं
रोद्धुं सन्धिं चानुसन्धातुमिष्टम् ।
यत्नं कुर्वे; सन्धियत्नः सुसाध्यः
स्याच्चेत्सर्वश्रेयसे स्यात् स कामम् ।। 42

सन्धेर्यत्नो निष्फलः स्याद्यदि श्रीधर्मात्मंस्तत् कौरवाणां स्वरूपम् ।
उत्साहस्योत्कर्ष आजिप्रवेशोद्युक्तानां मे स्याद्विशुद्धं समस्तम् ।। 43

करोमि यत्नं स सुयोधनस्ते न राज्यभागं दिशति प्रलोभी ।
युद्धं तु तथ्यं भवति प्रकाममुत्साहयुक्तो भव धर्मज त्वम् ।। 44

चतुरङ्गबलोपेतः सन्नद्धो भव संगतान् ।
सामन्तान् कुरु शीघ्रं त्वमित्युवाच जनार्दनः ।। 45

युद्धं संभवतीत्यस्मान् भीतान् किं कुरुषे हरे ।
कुमतिं धार्तराष्ट्रं तं शमयेच्छाबलेन ते ।। 46

मदान्धः पापात्मा तव कुमतिराप्तस्य वचनं
श्रुणोतीत्याशा नो स्वजनहितबोधं स मनुते ।
न नावं हे श्रीमन् प्रभवति भवान्नेव मनस–
तदीयस्याप्रीत्या तुदति स च ते भव्यहृदयम् ।। 47

तस्य ये दयमानास्तान् हन्तुं स यतते सदा ।
तृणाय मन्यते मे न बाहाशक्ति सुगर्वितः ।। 48

अस्मासु तेषु सुसुखं चिरमेकमत्या
जीवत्स्ववाच्यविधयाऽकृतीः स तेने ।

नान्यः कुलक्षयकरोऽस्ति सुयोधनात्त—
त्प्रोत्साहकास्तु बहवः किल कर्णमुख्याः ॥ 49

आबाल्यतोऽयमघकृद्द्रूयदः प्रजानां
सन्मार्गवर्तिविबुधप्रततेश्च मूढः ।
स्वीयाभिजात्यगुरुताप्रगतेर्विरुद्धं
कृत्यं न कार्यमिति नो धिषणास्य जाता ॥ 50

अयुक्तः सोदराणां नः कलहोऽनर्थदायकः ।
श्रुत्वा हितैषिणां बोधं स्वस्वभागस्य शास्त्रतः ॥ 51

प्राप्तस्य पालनं श्रेय उभयोरिति मे मतिः ।
अतः सन्धिं समिच्छामः साधयत्वं तमच्युत ॥ 52

एवं मद्वावयतो भीष्मं तं सुयोधनमुद्धतम् ।
कुरुराजं सभायां त्वमावेदय बुधान् नृपान् ॥ 53

श्रुत्वा भीमवचांसि दैत्यदमनः स्वे मानसेऽचिन्तय—
न्मञ्जुस्मेरमुखोऽद्य भीममुखतश्चित्रातिचित्रं वचः ।
अश्रौषं, ज्वलनस्य शीतलतया भानं गतिः क्ष्माभृतो
यद्वत्तद्वदतीव सन्धिनिरतिर्भीमस्य कोपाकृतेः ॥ 54

युद्धप्रीत्या प्रबलविमताखण्डदर्पप्रणाशे
धृत्याऽभीत्या कुरुपतिसुतौन्नत्यविद्वेषबुद्ध्या ।
भ्रातू राज्यार्जनविषयकोद्योगसक्त्यातिभीम—
स्त्वं त्वद्भीमप्रकृतिविमतालापकारी कथं स्याः ॥ 55

अज्ञातभीतित्त्वेन त्वयासौ भीरुताऽहिता ।
अधीता भीम कस्मादित्यहसत्केशवो गुरुः ॥ 56

स्मितदीप्तमुखाम्भोजो वायुसूनुरिदं वचः ।
उवाच वसुदेवस्य सूनुं स्वोत्कर्षसूचकम् ॥ 57

मम बाहुबलं मत्वा न काकं यदुकेसरिन् ।
नार्हसीदृग्विधं वक्तुं रोदसी अपि चालये ।। 58

श्रुत्वेदं हरिरुक्तवान्पवनजं सम्यङ्मयोक्तं वचः
सत्यत्वेन न गृह्यतां भवसि भो योधाग्रणीराहवे ।
त्वं विस्मृत्य परैः कृता अपकृतीरेवं ब्रवीषीत्यहं
वच्म्येवं तव शक्तिमाहवशिरस्युग्रां न जानामि किम् ।। 59

पार्थो मामवृणोत्स्वसारथितया स्वस्यन्दनस्याहवे
याच्ञा तस्य वशंगतेन च मया साङ्गीकृता कामतः ।
त्वत्साहाय्यमपीहिततमं युद्धेषु नः सर्वथा
शत्रूणां विजयं विनान्यविधिना केनाप्यते श्रीर्यशः ।। 60

पार्थस्त्वं पृथुशूरताविलसितौ भव्ये युवां संगरे
गान्धारैर्भुजशक्तिदर्पशरणौ क्षोभं निवार्य स्थितौ ।
पश्यामो वयमुच्छ्रितैर्भयभराक्रान्ता हि युद्धान्मुखो
यातं कुप्यति नैव शून्यवचनान्याकर्ण्य भीमोऽसमः ।। 61

प्रवृत्ते संग्रामे मदगजघटाकुम्भवितते–
र्यथा भिन्नाश्वानां धरणिपतनं स्याद्गुरुततेः ।
रथानां भिन्नानां रथिकपदगानामपि तते–
र्गदाहस्तो युद्धे रिपुनिधनकृत्स्यामयि तथा ।। 62

श्रुत्वेदं वचनं जगाद स हरिर्भीमं महावीर्यवां–
स्त्वं शक्तिस्त्वसमास्ति ते गुरुतरापद्वारिधेः साह्यतः ।
प्राक् ते सन्तरणं विधाय सुसुखं वर्तामहे निर्भयं
पौनः पुन्यमनुग्रहीतुमनघालं प्राग्यथा नोऽधुना ।। 63

गत्वा श्रीधर्तराष्ट्राणां सभां तान् कुरुनन्दनान् ।
अनुनीय दृढं सन्धिं निश्चिनोमि सुखास्पदम् ।। 64

उवाच सोऽर्जुनः कृष्णमश्रृणोस्त्वं यदग्रजात् ।
यत्तत्सर्वं निवेद्यं ते किं वाच्यं मे ततोऽधिकम् ॥ 65

वृद्धो राजा लोभसंग्रस्तचेताः सूनुस्तस्याबाल्यदुष्टप्रवृत्तिः ।
भाव्यः सन्धिर्नेति ते ज्ञात एवोग्राजिं हित्वा कार्यसिद्धिः कथं स्यात् ॥ 66

कर्त्तुं कार्यं यदभिलषितं तत्त्वया क्षेमदं स्या-
द्भूव्यं वा यल्लसति न भवेत्तत्प्रयत्नः स्वशक्त्या ।
कार्यः पुंसः कृषिफलगतो देवसाहाय्यसंप-
त्प्राप्त्या सम्यग्द्वयमपि भवद्दिव्यलीलाविनोदः ॥ 67

एते धर्मतनूजधिक्कृतिकरा विद्रोहिणः सर्वथा
वध्या इत्यखिलैर्जनैः सुविदितं सम्यक्त्वयाप्याशयः ।
नान्यस्तत्र निदानमेव भवतश्चेतो व्यथा योदिता
वीक्षातोऽस्मदभेद्यसंकटततेर्यन्मूलमेते द्विषः ॥ 68

तथापि श्रीनाथ श्रममगणयित्वा परिभवान्
सहित्वा द्रौपद्याः कुरुसुतकृतान् काननतले ।
उषित्वा क्लेशानां सहनमसमं नः सुविदितं
तवातः सन्ध्यर्थं कुरु सफलयत्नं हितधिया ॥ 69

अस्माकमविदित्वा तैः शक्ति दत्तः श्रमो हृदि ।
ऊषरक्षेत्रनिक्षिप्तबीजवन्नाशनं गतः ॥ 70

सन्धिं निश्चिनु राज्यस्य भागमर्धं लभेत नः ।
यथा ते च वयं स्याम सुखवन्तस्तथा हरे ॥ 71

यदि नो रोचते सन्धिस्तेऽद्य यूयमिमां कृतिम् ।
एवं विधाय दुःखाब्धिं तरतेति हितं वद ॥ 72

हितं न स्यादेवं भवति हितमित्थं सुसरणि-
र्भवेदेषा चेति प्रभवति कथं मादृशजनः ।

प्रवक्तुं, यो मार्गो हितकृदयि निश्चित्य तमरं
वद त्वं श्रित्वा तं जयमसममाप्स्याम च वयम् ।। 73

प्रकृष्टोपायेन प्रचुरवसुना दोहदविधिं
विधायापि प्रीत्या गुरुकृषिफलम् नैव कृषिकः ।
विना वृष्टिं काले व्रजति कृतयत्नोऽपि न नृपो
विना देवस्याप्तिं व्रजति करुणाया युधि जयम् ।। 74

अर्जुनोक्तवचः श्रुत्वा प्रत्युवाच तमीश्वरः ।
यदुवंशान्वये रत्नदीपः कृष्णमहोदयः ।। 75

सन्धेर्यत्नमहं करोमि विविधैर्मार्गैर्यथाशक्ति स—
द्वेच्छां तु न वेद्मि दुष्टचरितो दुर्योधनो दुर्मतिः ।
आबाल्याद्भवतामनर्थकरणे व्यग्रोऽतिलुब्धः स्वयं
राज्यस्यार्धसमर्पणाय सुमुखो न स्यादवश्यं खलः ।। 76

आयातोऽयं फल्गुनः शक्यते नो
वक्तुं युद्धो को जयेत् को जयेन्नो ।
युद्धे प्राप्ते स्याज्जयो ह्येकपक्ष
स्यातः सन्धिः कृत्य एवास्ति नोऽद्य ।। 77

इत्यार्यभीष्मगदितं वचनं निशम्य
पूर्वं गवां ग्रहणकाल इति प्रकाशम् ।
ऊचे सुयोधननृपो न हि सन्धियोगो
राज्यस्य भागशकलं न ददामि तेभ्यः ।। 78

युद्धे पराक्रमवतां धरणीप्रभुत्वं
श्रीधर्मसूनुवचनं परिपालनीयम् ।
गोष्ठीं प्रविश्य कुरुराट्तनयस्य भावं
तत्साह्यकार्यमहं सकलं प्रवेद्मि ।। 76

कृष्णेनोक्तामिमां वाचं सुनिशम्य प्रियः सुतः ।
माद्र्या उवाच नकुल एवं कृष्णं हितैषिणम् ॥ 80

श्रृणु मदुक्तिमपीश गुरो हरे यमसुतानिलसूनुकिरीटिभिः ।
यदुदितं वच एव तदर्हति प्रगणनां तव दौत्यसमुद्यमे ॥ 81

संवीक्ष्यास्मदनीकसन्ततिमनेकाक्षौहिणीविस्तृतां
सामन्तान् यदुपाण्ड्यकेकयनृपान् भीमार्जुनावुद्धतौ ।
त्वत्साहाय्यमपीद्धदेशिकयुगप्राज्योपदेशं श्रिताः
पश्चाद्गोग्रहणस्य कौरवजना भीरुत्वमाप्ता न किम् ॥ 82

उपदेशं कृतं चान्यप्रमुखैर्विदुरादिभिः ।
भवता च कथं नैव श्रृण्वन्ति कुरुराट्सुताः ॥ 83

सहदेवः समाकर्ण्य सर्वमुक्तं स्वसोदरैः ।
दामोदरमुवाचैवं विवृण्वन् स्वाशयं स्फुटम् ॥ 84

वाच्यं सर्वं प्रोक्तमग्र्यात्मजेन श्रीपाण्डोः श्रीवायुसून्वर्जुनाभ्याम् ।
श्रुत्वा सर्वं त्वार्य मौनं दधासि प्रज्ञाशालिन्नैव सन्धिर्भवेत्तैः ॥ 85

ईदृग्दैन्यं युज्यते नैव दूष्यं भूपालानां बन्धुमित्रादिकेभ्यः ।
सामन्तेभ्यो न्यक्कृतिः स्यात्प्रयत्नौ ज्येष्ठभ्रातुस्ते च सिद्धिं न यातः ॥ 86

त्वन्निर्बन्धप्राप्तसन्धिः कथं स्याद्दीर्घस्थायी युद्धमेवोचितं स्यात् ।
वक्रालापो रोचते नैव मह्यं गान्धारेयान् ब्रूहि मन्निश्चयं त्वम् ॥ 87

महाराज्ये नष्टे कपटविधिनारण्यवसतिं
तथाज्ञातावासं श्रममगणयित्वा नियमतः ।
समाप्य स्वस्थानां यदवितरणं नः कुरुपते–
र्न युक्तं दायस्येत्यनघ वद वाचा मम दृढम् ॥ 88

श्रुत्वा सात्यकिरुक्तवान् स सहदेवोक्तं भवत्युत्तमं
श्रव्यं ग्राह्यमयोग्यवर्तनयुतो दुर्योधनो दायकम् ।
दत्ते नैव भवेन्न सन्धिरचना सोत्साहसन्नद्धता
युद्धस्यैव सुवीरमोदजनिका संग्राम एवोचित: ।। 89

तत्रत्यरथिका: सर्वे सहदेवस्य सात्यके: ।
राजनीतिज्ञतां सम्यक्प्राशंसन् प्रीतिपूर्वकम् ।। 90

नानाप्रकारा अन्यैश्च वीरालापा: कृता जनै: ।
संभूय संसदि प्रापुस्तारावर्त्म महोन्नतम् ।। 91

संतप्तहृदया धर्मनन्दनोक्तिभिरच्युतम् ।
द्रौपदी शोकदीनास्य सगद्गदमुवाच सा ।। 92

श्रित्वा मार्गममानुषं सकलुषं तै: कौरवैरुद्धतै:
सन्देशं बत सञ्जयस्य विफलं द्वाराऽऽजियोगं विना ।
सन्धे: प्रेषितमाश्रितो यमसुतस्तृप्तिं गत: स स्वयं
लोभी ग्रामकपञ्चकं न हि दिशत्यत्यल्पदुर्योधन: ।। 93

प्रेम्णा स्वीयसहोदरेषु सहते किं यमस्यात्मज:
पूर्वान्स्वीयपराभवान्यदि भवेत्सन्धिर्विना न्यायत: ।
राज्यस्यार्धमनेकधा जनततिर्निन्देन्न किं नो मुहु-
र्लज्जानीतिपराक्रमैर्विरहिता इत्यस्मदीयै: समम् ।। 94

औत्कृष्ट्यापचयेन दभ्रशकलं राज्यस्य किं पाण्डवै:
प्रार्थ्यं, सन्धिरनेकधा कुरुपतेरेवास्ति लाभप्रद: ।
किं नालं निजकार्यसाधनकृते स्वीयो जनश्चेद्रणं
भीति: का विपदामतीव सहने विप्रा न पाण्डो: सुता: ।। 95

भीतिर्नास्ति सुयोधनस्य हृदये युद्धाभिभूते: परै-
र्नो मूच्छन्ति तवाप्तवाक्यनिचयास्तच्चित्तवृत्तौ पुन: ।

औद्धत्यं परिवर्धते यदि भवेत्तत्रैव बीजार्पणं
युद्धस्यानिमुखं विहाय विपिनं गच्छन्ति किं पाण्डवाः 96

एवं वच्म्यहमित्यहंकृतियुतां मन्यस्व मां नो हरे
श्रीधर्मात्मजमुख्यबोधितवचोभङ्गो यथा नो भवेत् ।
माहात्म्यस्य तवापि बन्धुजनताकार्यस्य न स्याच्च्युतिः
गान्धारैः सह सन्धिमाचर तथा सर्वाधिकारान्वितः ।। 97

केशाकर्षणदुष्कृत्यान्यक्कृता दुःखपूरिता ।
प्रजल्पामि विवेको मे विपन्नायाः कुतो भवेत् ।। 98

वरेंणोत्पन्नाहं भरतजनने प्राप्तवसतिः
स्नुषा पाण्डोः पत्नी जननुतमहाविक्रमवताम् ।
प्रवीरणां माता तव चरणकञ्जातशरणा
प्रशस्तिर्मे भ्रातर्बहुलगतिभिर्लोकवितता ।। 99

सुभद्राया यां मामधिकतरवात्सल्यगुरुता—
दयादाक्षिण्याद्यैः सततमपि संभावयसि सा ।
अहं तैः कौरव्यैरवभृथपवित्रीकृतलस—
च्छिरोजेष्वाकृष्टा मम पतिषु पश्यत्सु समितौ ।। 100

दुःशासनेन समितिं प्रति नीयमानां
मामेकवस्त्रसहितां मम भर्तृदेवाः ।
वीक्ष्यापि चित्रलिखिता इव नष्टचेष्टा
आसंस्तदाहमभवं शरणं गता त्वाम् ।। 101

औचित्येन विना तदा कुरुपतिर्मां स्वस्नुषां निर्दयं
दासीत्वेन समाचरत्तमधुना मद्भर्तृपादैः समम् ।
याता स्नौषमहं चरेयमथवा दासीत्ववृत्त्यास्थिता
तत्रान्तःपुरचेटिकावदधमा स्यां ब्रूहि मां श्रीहरे ।। 102

विस्त्रस्य स्वं द्रुपदतनया केशबन्धं स्वकैश्यं
रूक्षं कालोरगमिव ततं पाणिना दक्षिणेन ।
संगृह्य स्वे मनसि सहसा रोषशोकप्रभिन्ने
बाष्पाकीर्णेक्षणकलुषितास्या समुत्थाय शीघ्रम् ।। 103

दुःशासनाकृष्टमिदं करेण कैश्यं प्रभिन्नं च ततोऽवशिष्टम् ।
स्मर्तुं त्वमेतत्तु समर्हसि त्वत्प्रभाषणे तैः कुरुराजपुत्रैः ।। 104

योऽकर्षन्मे शिरोजान् समरतलगलद्देहखण्डान्यदृष्ट्वा
क्रोधाग्निर्मे न शान्ति व्रजति सुनिशितस्तस्य दुःशासनस्य ।
व्यर्थे श्रीधर्मजोऽहं यदि दलितशवं राजराजस्य युद्धे
नो पश्येवानिलस्यात्मजभुजगुरुता गाण्डिवं चेन्द्रसूनोः ।। 105

यथाग्निं वस्त्रान्ते मम मनसि मन्युं सुनिदधा–
म्यनल्पः कालोऽभूत् गत इह तदीयोपशमनम् ।
न जातं सोदर्ये त्वयि सति दुरात्मप्रहनने
समर्थे मे भर्तृष्वपि भयदतेजोनिधिषु भोः ।। 106

दुःखाक्रान्तान् द्रौपदीं श्रीमुकुन्दः कारुण्यार्द्रः सम्यगाश्नास्य दीनाम् ।
आसीनां तां मानिनीं प्रेमपू स्वे बिश्वासं कल्पयन्नेवमूचेव् ।। 107

अलं दुःखेनार्ये मयि भवति भीमं च विजयं
सहायत्वेनाप्य श्रितयमसुताज्ञः स्वशिरसा ।
क्षयं गान्धाराणां त्वदभिलषितं साध्यमचिरा–
द्विधातुं शक्तोऽहं वितरति न भागं कुरुपतिः ।। 108

कुरुनृपालकलत्रसुतादिकप्रबलरोदनमेव पतेद्द्रुतम् ।
श्रवणयोस्तवदैवनियोगतो नहि निवार्यत एव कुरुक्षयः ।। 109

अचिरमेव रिपुक्षयकारणादधिकविस्तृतराज्यरमावृताम् ।
तव धवांस्त्वमतीव मुदन्विता धृतपदान् परिपश्यसि निश्चितम् ।। 110

श्रुत्वा सान्त्वनवाक्यानि द्रौपदी स्वस्थचित्तताम् ।
विन्दति स्म ततः पार्थः प्रोवाचैवं जनार्दनम् ॥ 111

पाण्डवाश्च धृतराष्ट्रसूनवो बान्धवास्तव न तेऽत्र भेददृक् ।
पक्षयुग्महितमेव सत्वरं साधय प्रबलयत्नयोगतः ॥ 112

धर्मार्थसंगतं यद्यद्भाषितं धर्मजेन तत् ।
तद्वेदय सभायां तान् कौरवान् त्यज तत्फलम् ॥ 113

श्रुतविजयसदुक्तिर्वासुदेवस्तमूने
यमसुतकृतबोधं धारयन्नेव मूर्ध्ना ।
हितकरकृतिमेवाश्रित्य वः कौरवाणां
कुरुजनपतिगोष्ठीं तामवश्यं विशेयम् ॥ 114

0 0 0 0 0

प्रातःकाले समुचितकृतेर्वासुदेवः समाप्य
श्रीभास्वन्तं ज्वलनमपि संसेव्य विप्रान्समर्च्य ।
वस्त्रार्थाद्यैरभिमततदीयाशिषो भक्तिपूर्वं
स्वीकृत्यासीत् करिपुरवरं तत्क्षणे गन्तुकामः ॥ 115

आनीतं दारुकेणागणितमणिरुचिं स्वायुधैश्चक्रमुख्यैः
संनद्धं शैब्यमुख्यैः प्रथितहरिवरैर्योजितं तार्क्ष्यचिह्नम् ।
आरूढः स्यन्दनं स्वं यदुजनसहितं सात्यकिं स्वीयपार्श्वे
संवेश्योद्दण्डभेरीवरनिनदयुतो निर्ययौ कृष्णदेवः ॥ 116

प्रस्थायामूल्यमत्तद्विपरथसहितान् वैभवेनागतांस्तान्
तान्मात्स्यान् यादवाद्यान् समुचितविधिनाऽऽभाष्य सत्कृत्य सर्वान् ।
दर्शं दर्शं प्रमोदं शुभशकुनततीर्यानसक्तेऽच्युते स्वं
सूनुर्धर्मस्य सम्यङ्निकटगतमरं स्यन्दनं तद्रथस्य ॥ 117

सन्धायावददेवमच्युत महासध्वीं समन्त्रनासया–
त्यन्तं मम भ्रातरं कुरुकुलातिश्रेष्ठभूषायिताम् ।

नत्वा तां सुनिवेदयात्मगदितान्भक्तिप्रणामान्बहूं—
स्तस्यै तामुपगूह्य तद्दिवसच्चिन्तापनोदं कुरु ।। 118

लाक्षावेश्मन आरभ्य दाहादस्मत्प्रसूः शितान् ।
क्लेशान्प्राप्ताऽसहायेव तां सान्त्वय यथोचितम् ।। 119

न केवलं मदुक्त्यैव त्वच्छरण्यां तु सान्त्वय ।
तां दुःखमुक्तिरत्यन्तसामीप्येऽस्तीति बोधयन् ।। 120

भीष्मादिवृद्धगुरवःसुहृदोऽधिपा ये
बन्धुव्रजाश्च कुरुराट्शरणे वसन्तः ।
तान् प्रत्युदीरय कृतान् बहुलप्रणामा—
न्भक्त्यास्मदीयवचसा विनयप्रधानान् ।। 121

मध्यस्थं हितमभ्येत्य विदुरं परिरभ्य तम् ।
मत्पक्षे पृच्छ तं योगक्षेमादिकमधोक्षज ।। 122

समाप्ते वचने धर्मनन्दनोक्ते धनञ्जयः ।
श्रीकृष्णं स्वाशयं सम्यगवेदयदतिस्फुटम् ।। 123

राज्यस्यार्धग्रहणविषये नापवादोऽस्मदीयो
ज्येष्ठभ्रात्रेत्युदितसमयो गृह्यते कौरवैश्चेत् ।
ओमित्युक्तिर्यदि सहकृतिर्नैव तांस्तान् समस्ता—
न्हन्यां जालमान्कुरुकुलगतान्पिष्टपेषं पिनष्मि ।। 124

श्रुत्वेदं श्रीविजयवचनं प्रोद्धती भीमसेनो—
ऽत्यन्तं स्पष्टं मुदितमनसोद्बृंहितस्वीयवाचा ।
दर्पाधिक्यात्प्रबलविततांङ्गो दिदीपे गजो वा
तप्तोऽत्यन्तं विततनिनदप्रेक्षणीयः प्रजानाम् ।। 125

नकुलः सहदेवश्च श्रुत्वा भ्रातृभिरीरितम् ।
गच्छ निश्चिनु सन्धिं वा युद्धं वेत्यूचतुर्हरिम् ।। 126

आपृच्छ्य सर्वान् पथि नारदादिमुनीन्द्रवर्याशिष आनतः सन् ।
स्वीकृत्य शीघ्रं स ययौ रथेन कुशस्थलं सायमधोक्षजोऽर्च्यः 127

समागतं तं विधिवत्कुशस्थले
विप्रा अखण्डादरभक्तिपूर्वकम् ।
सार्घ्यं सपाद्यं कुसुमैश्च धूपै—
रमूल्यवस्त्रादिभिरार्चयन् भृशम् ॥ 128

श्रुत्वा हरेरागमनं कुशस्थलं
स वृद्धराजः प्रशशास चात्मजान् ।
पुरीं विधातुं समलंकृतां द्रुतं
तेऽकारयन् सर्वकृतीर्विधानतः ॥ 129

मृगमदसुबिलिप्तं भूतलं सर्वतो द्रा—
ग्विरचितमभवत्सद्रङ्गवल्लीकदम्बम् ।
प्रविमलगृहकन्थाः कुङ्कुमेन प्रलिप्ता
मणिमयवरदामालङ्कृतं सौधबृन्दम् ॥ 130

मणिमयरथसन्ततिं प्रशस्तां
शुभमददन्तिचयाननुत्तमान् ।
कनककृतसुभूषणानि दासी—
जननिवहं हरये ददाम्यहम् ॥ 131

सुयोधनगृहे चास्मत्सौधे दुःशासनस्य च ।
सौधे यद्रोचते तस्मै हरये दापयामि तत् ॥ 132

श्रुत्वेदं वचनं जगाद विदुरस्तं वृद्धभूपं हितं
नोत्कोचेन हरिं गृहाण नृपते तस्य प्रियाः पाण्डवाः ।
तृप्येन्मङ्गलकुम्भपाद्यकुशलप्रश्नैर्नितान्तं हरि—
स्त्वकृत्यं कपटं विनैव विधिवत्कृत्वा शिवं प्राप्स्यसि ॥ 133

दुर्योधनश्च विदुरोक्तवचो निशम्य
प्रोवाच तं यदखिलं विदुर त्वयोक्तम् ।
सत्यं हरिस्त्यजति नैव युधिष्ठरादी–
न्प्रीतो भवेन्न च महार्हधनादिदानैः ॥ 134

भीष्मस्ततोऽवददिदं नृपमस्य पुत्रं
धर्मार्थसङ्गतमसौ हरिराप्तबन्धुः ।
वाक्यं यदुत्क्षिपति तद्वहनं स्वमूर्ध्ना
प्रीत्योभयोर्भवति सङ्गतये शुभानाम् ॥ 135

श्रुत्वा भीष्मोक्तवाक्यं निजजनकमवोचत्स दुर्योधनोऽयं
श्रीकृष्णस्योपदेशो भवति वितरणायार्धराज्यस्य पाण्डोः–
पुत्रेभ्यो नैव दातुं शकलमपि दृढो निश्चयो मे हरिं तं
बद्धुं पाशैः सयत्नोऽप्यहमिति. स पिता प्रत्युवाचात्मजं स्वम् ॥ 136

एषा युक्तिः स्याज्जगद्द्रोहमूलं माहात्म्येन प्रश्रुताः सर्वलोके ।
दूता धर्मोत्साहयुक्ता अवध्या अस्मद्बन्धुर्नैव कृष्णोऽपकारी ॥ 137

पश्चाद्वृद्धः कुरुकुलपतिः सूनुमत्युग्रवाक्यै–
र्दुस्संकल्पात्कलुषचरितं तं नियन्तुं प्रयत्नम् ।
चक्रे; भीष्मः कुलकुलपतिं चैवमूचे स जाल्मो
नश्येत्तथ्यं यदुकुलपतौ योऽपराध्येत शीघ्रम् ॥ 138

0 0 0

अनन्तरदिने कृष्ण आपृच्छ्य सकलान् द्विजान् ।
कुशस्थलवरात्प्रातर्निर्ययौ हर्षसंभृतः ॥ 139

प्रत्युज्जग्मुः श्रीहरिं मार्गमध्ये
भीष्मद्रोणौ बाह्लिकः कौरवाद्याः ।
बन्धुव्रातो मित्रवर्गः प्रभूतै–
र्गन्धैः पुष्पैर्भक्ष्यभोज्यैर्विशिष्टैः ॥ 140

तूर्यादिमङ्गलरवैः समुपेयुषस्ता–
न्संभाव्य पट्टणवरं समलंकृतं सः ।
संवेष्टितो मुरहरिर्महनीयपौरै–
र्भूपैः प्रविश्य गतवान्पृथुराजमार्गे ।। 141

अवाकिरन् वधूवर्गा हर्म्यस्थाः पार्श्वयोद्वयोः ।
अक्षतान्ससुमान्प्रीत्या प्रोचुरेवं हरिं प्रति ।। 142

राक्षस्याः स्तन्यपानं ह्यसुगणसहितं योऽकरोत् स्वीयबाल्ये
चाणूरं घोरकृत्यं पृथुबलसहितं यो बभञ्जावलीलम् ।
दुर्वृत्तं मातुलं स्वं जगदुपकृतिकृच्छैशवे यो जघान
प्रोन्मूल्य स्वर्गवृक्षं परिमलभरितं यो ददौ स्वप्रियायै ।। 143

योऽकरोच्चौर्यमाभीरनारीणां चेतसां तथा ।
पयसां यस्य पादाब्जसुरभिं श्रुतयो ययुः ।। 144

स एवायं समायातः पूर्वपुण्यवशात्पुरीम् ।
अस्माकं स्वीयमैत्राभ्यां पपुस्ता दर्शनामृतम् ।। 145

आबालवृद्धपूरवर्तिमहाजनैः श्री–
श्रीकृष्ण एत्य विलसन्मणितोरणं तत् ।
राज्ञः पुरं निजरथादवतीर्य पद्भ्यां
मन्दं चरंस्थविरभूपतिमुख्यवर्गैः ।। 146

प्रत्युत्थानपुरःसरं स विधिवत्संभावितः कौरवैः
संभाव्यादरपूर्वकं स विदुरं चान्यान् विशिष्टान् बहून् ।
दिव्ये भर्मविनिर्मिते सुरुचिरे सिंहासने सुस्थितः
सम्यक्सत्कृत आबभौ कृतमहाराजोपचारादिकैः ।। 147

धृतराष्ट्रनृपेण बान्धवैर्जनपैः सम्यगलङ्कृता सभा ।
कमलाक्षयुता बभौ श्रिया सरसी वा हरिदश्वभूषिता ।। 148

धर्मराजवचनैस्तदा हरिः सादरप्रणतिवाचनादिकम् ।
वृद्धराजगुरुबन्धुसुधीरानब्रवीन्मधुरभाषणपूर्वम् ।। 149

आज्ञामवाप्य नृपतेर्विदुरस्य गेहे
संप्राप्य भक्तिभरितान्बहुधोपचारान् ।
प्रीत्या कृतान् सविनयं सदयं स कृष्णः
प्रीणाति तं स्म यमसूनुनमांसि चोक्त्वा ।। 150

त्वरितमुपगता सा माधवं स्वीयगेहे
सदयगतमनूनप्रेमसौहार्दभव्यम् ।
विकसितहृदयाब्जा संपतद्बाष्पधारा
स्मृतनिजसुतवृत्ता शोकतप्ता च कुन्ती ।। 151

कुन्ती कृष्णस्वामिनाऽऽश्वासिता सा
त्यक्त्वा दुःखं प्रीणयित्वाच्युतं तम् ।
कैङ्कर्यैः स्वैः कारितैः प्रेमपूर्वं
पीठासीना तत्समीपेऽवदत्तम् ।। 152

त्वच्छिक्षातो विमलचरिताः शूरवर्याः सुता मे
पार्श्वस्थैस्तैर्धरणिपतिभिः सेव्यमानाः पुरा ये ।
घोरारण्येष्वधिकविपदां पात्रतां प्राप्तवन्तः
क्लेशान् घोरान्कथमधिगता निर्भयास्ते प्रशान्ताः ।। 153

मया प्रदत्तं तु पुरा सुता मे सुखेन भुक्त्वान्नमतीव रुच्यम् ।
सुखं शयानाश्च महार्हशय्यास्वतीव रूक्षक्षितिशायिनोऽद्य ।। 154

विधूतनिद्राः करिबृंहितैः पुरा
फलैश्च कन्दैर्विहितात्मवृत्तयः ।
गुल्मेषु निद्रां मृगराजबोधिताः
पर्यत्यजंस्ते विपिनावनौ कथम् ।। 155

कुशल्यपि श्रीयमसूनुरग्रिमः
कुशल्यपि श्रीबकशत्रुरुद्धतः ।
कुशल्यपि श्रीविजयोऽतिशौर्यवा–
न्यमी सुशीलौ कुशलावपि प्रियौ ॥ 156

साध्वी सा द्रुपदात्मजापि कुशला या मत्सुतेभ्योऽधिकं
प्रीतेर्मे पदमर्हतीन्तुवंदना यानन्यभक्त्या युता ।
मय्यत्यन्तपवित्रवृत्तिसुभगा यास्मत्कुलस्योत्तमा
भूषा यन्निकृतेः सदस्यहमपि प्राप्ता व्यथां दुःसहाम् ॥ 157

विदुरेण विना न कोऽप्यभूत्कुरुसूनोः कृतिरेति गर्ह्यताम् ।
इति वक्तुमधर्मनिन्दको बत धर्मस्य स एव संश्रयः ॥ 158

मुक्तिर्दत्ता निर्दयं कौरवैर्मे सर्वान् क्लेशानुक्तपूर्वान् मदीयान् ।
एषात्यन्तं दुर्भराचातिशेते गान्धारेया निर्विशेषाः सुतेभ्यः ॥ 154

मत्सूनुर्विजयो महोग्रसमरे प्रत्यर्थियोधान् स्वयं
जेष्यत्येव निजोग्रबाहुतरसा शूरान्महाविश्रुतान् ।
राज्यं विस्तृतमात्मसोदरयुतः शिष्ट्वा सुखं प्राप्स्यती–
त्यानाकं ततसान्द्रकीर्तिसुभगः प्रोवाच वाणी दिवः ॥ 160

काले जन्मन एव तस्य महती; सान्वर्थतामाप्स्यति
त्वत्कारुण्यत आगतः स समयः श्रीमन्महान् सांप्रतम् ।
मच्छूरप्रसवत्वमद्य फलतां यातु त्वदीयासम–
प्रज्ञापाटवसाह्यतो युधि भुजासारात्सुतानां मम ॥ 161

शौर्यं हित्वा याचना नावलम्ब्या
राज्यप्राप्तिः शौर्यमूला प्रशस्ता ।
औष्ण्यत्यागो वीतिहोत्रस्य वा स्या–
च्छौर्यत्यागो भूभृतां नानुरूपः ॥ 162

भुजबलेन कृतं निजजीवनं
भवति संस्तवनीयमनीदृशम् ।
इति सुतान् वद मद्वचसा हितं
नयतु तान् सुगतिं सदयं भवान् ॥ 163

कुप्यतो यदि स वासुयुतस्तत्फल्गुनो युधि महाबलशोभी ।
संमुखीथवितुमप्यतिशूरो कोऽपि नालमधियोधचयस्तौ ॥ 164

श्रुत्वा कुन्तीवचनमवदत्सान्त्वयंस्तां स कृष्णो
मूर्तीभूताखिलगुरुततिर्दीप्तवंशद्वया त्वम् ।
एतादृक्त्वं यदि न सहसेऽनिष्टदु:खं सहेत
स्त्री काह्यन्या तव हृदि रुजं नाशयामि प्ररूढाम् ॥ 165

वर्तन्ते ते सुखमयि सुता: सस्नुषा भक्तिपूर्वं
प्रेम्णा तै: स्वा: प्रणतिततय: प्रेषितास्तुभ्यमार्ये ।
त्वत्पुत्रास्ते कुरुकुलगतान् शस्त्रपेषं हि पिष्ट्वा
साम्राज्यं स्वं प्रथितयशसा शासति श्लाघ्यधाम्ना ॥ 166

कुन्ती श्रुत्वा प्रियतमवच: केशवस्यावदत्तं
फुल्लास्या सा त्वमसि जनको देशिको देव इष्ट: ।
धर्म्यं तेषां हितमति भवान् सम्यगालोच्य मार्गं
यं यं प्रीत्यादिशति विधिवत्ते श्रयन्त्येव तं तम् ॥ 167

न केवलं त्वं हितकृत्सुतानां
ममापि लोकत्रितयस्य कर्ता ।
त्राता च हर्ता शरणं गतानां
त्वां नैव नाशोऽस्ति कदापि तथ्यम् ॥ 168

आमन्त्र्य कुन्तीं कृतवर्मसात्यकी
स्वेनैव नीत्वा हरिरेत्य भूपतिम् ।

सुयोधनं स्वे सदने स्थितं तं
तेनार्चितोऽभूद्विधिवत्प्रकामम् ॥ 169

दामोदरः स्वयमुपागत आप्तदौत्यो
दुर्योधनेन बहुधा विनयादराभ्याम् ।
संप्रार्थितोऽपि न स ऐच्छदनेन भोक्तुं
भोक्तुं मनः स विदुरेण बबन्ध तस्मात् ॥ 170

अपकृता वरपाण्डुसुतास्त्वया मम तु तेऽसुसमानतया स्थिताः ।
कथमहं तव भोक्तुमरेर्गृहे मम मनोऽनुनयामि ससंशयम् ॥ 171

परगृहेऽमृतभोजनमप्यलं जनयितुं प्रतिकूलधियं सताम् ।
तव च भोजयितुं मम भोक्तुमप्ययि सुखाय कृतिर्न भविष्यति ॥ 172

इत्थंकारं निश्चयं स्वं मुरारिः
स्पष्टं प्रोच्यानार्यदुर्योधनं तम् ।
मिष्टान्नं श्रीवैदुरे दिव्यगेहे
प्रीत्यात्ति स्म स्वं मनः संनिहत्य ॥ 173

प्रीणयित्वाच्युतं सम्यङ्मृष्टान्नादिसपर्यया ।
विदुरस्तमुवाचैवं विस्रब्धं प्रीतिपूर्वकम् ॥ 174

दुर्योधनो मूर्खजनाग्रगण्यो दुष्टात्मकस्त्वद्धितकारिवाक्यम् ।
शृणोति नैवात्मजयस्य कर्णः संपादनायालमिति प्रबुद्धया ॥ 175

उल्लङ्घितुं त्वद्धितकारिवाक्यं
दुर्योधनाद्याः कृतनिश्चयास्ते ।
अन्ये च भूपाः कुरुराजसूनोः
साहाय्यदाने स्वजनैः स्वसैन्यैः ॥ 176

सन्धिर्न साध्यः कुरुभूपपुत्रैः
नाशस्तदीयोऽस्त्यतिशीघ्रकाले ।
पाण्डोः सुतेष्वादरतश्च भक्त्या
वच्मीदमार्य त्वयि तेऽरयस्ते ।। 177

श्रुत्वेदं वच आदराद्विदुरतः कृष्णोऽवदत्तं सखे
जानाम्येव सुयोधनस्य कुमतिं तत्साह्यकृद्दुर्मतिम् ।
संनद्धे युधि पक्षयुग्म उदिते मृत्योः प्रवेष्टुं मुखे
तन्नाशस्य निवारणं सुकृतिनां जायेत धर्मोऽनघः ।। 178

उदिते स्वजनेषु विग्रहे यदि तूष्णीं भवति प्रियो जनः ।
गुरुशक्तियुतोऽपि कातरं परुषं तं प्रवदन्ति पण्डिताः ।। 179

सर्वात्मशक्त्या च यतेऽहमुद्धतं
सुयोधनं संगरदूरवर्तिनम् ।
विधातुमन्यं गुरुपक्षपातिनं
सुतेषु पाण्डोः प्रविचिन्त्य मां वचः ।। 180

शृणोति चेदों स तु नावधारये-
त्तथास्तु कृष्णः सहजेषु संगरम् ।
अलं नियन्तुं, कृतवांस्तथा नही-
त्यशेषलोकेऽहितलोकदूषणम् ।। 181

नाप्स्यामि सम्यक् क्रियते कृतिर्यदी-
त्युदीर्य शीघ्रं विदुरस्य गेहतः ।
सुयोधनाभ्यर्थित एव शोभनां
सभां कुरूणामधिपस्य सोऽविशत् ।। 182

तेजोराशिर्दानवारिः समस्तान्प्रत्युत्थानं कुर्वतस्तान् यथावत् ।
संभाव्यायं रत्नपीठे महार्हे स्थित्वा रेजे कल्पितायां सभायाम् ।। 183

सर्वग्रहेषु रविवत्कुरुवंशजेषु
प्रेक्षार्थमागतमुनिप्रकरस्य योग्यम् ।
श्रीकृष्णबोधितविधिं समुपाश्रयन्त-
स्तेऽर्घ्यादिकं व्यरचयन्कुरुराजपुत्राः ॥ 184

धृतराष्ट्रनृपे स्वकीयकैर्विदुरेणोत्तमदेशिकैर्नृपैः ।
अधितिष्ठति शक्रवत्समज्यामतिदिव्यां हितमित्रबान्धवैः ॥ 185

राजीवाक्षं मेघवर्णं शुभाङ्गं
लक्ष्मीकान्तं तत्र सिंहासनस्थम् ।
दृष्ट्वा सर्वे स्वीयनेतृत्वपुण्या-
मूल्योदर्कं प्रापुरत्यद्वितीयम् ॥ 186

सर्वे सभ्या निश्चला निर्विकल्पा-
श्चित्रे न्यस्ता वा विना तेऽभिभाषाः ।
श्रीकृष्णस्य प्रोज्ज्वलद्दिव्यवीक्षा-
ऽऽकृष्टास्तस्थुः स्वे वशेऽविद्यमानाः ॥ 187

जलदनादगभीरपटुस्वनो
विशददन्तरुचीः प्रविसारयन् ।
अखिलसभ्यसमक्षमुवाच तं
हरिरिदं धृतराष्ट्रनृपं वचः ॥ 188

विद्यारूपस्त्वं महीजानिसिंह
प्रेम्णा न्याय्यं पथ्यमेवोपदेष्टुम् ।
त्रातुं सर्वं भारतं वंशमीड्यं
त्वन्मुख्योऽहं प्राप्तवान्संसदं ते ॥ 189

नृप पाण्डुसुतास्त्वदीयपुत्रा
यदि सम्यङ्निवसेयुरैक्यतः ।

अतिहर्षमवाप्नुवन्ति सर्वे
वशगा ते ह्यखिला तदेकता ।। 190

भरतान्वय एव धर्मयूप: करुणासत्यरतीद्धसंश्रय: ।
इति निस्तुलकीर्तिरस्य रक्ष्या तव पुत्रैश्च युधिष्ठरादिभि: ।। 191

त्वं मूलं कुरुराजविश्रुतकुलस्यैतस्य हानि: कदा–
प्यापन्ना यदि ते तनूजनिकरस्यापि त्वदीयस्य वा ।
भ्रातु: पुत्रचयस्य तत्परिणतिस्त्वय्येव मूर्छत्यतो
वृत्तं श्लाघ्यमखण्डसख्यमखिलं ते रक्ष्यमव्याजत: ।। 192

श्रीदुर्योधनमुख्यशूरनिचया धर्माभिरक्षाऽरता:
कार्याकार्यविचारवर्त्मविमुखा वंशोन्नतिद्रोहिण: ।
कृत्यैर्घोरतमै: स बन्धुजनतासन्तापकृत्ये रता
दुष्टान् निन्द्यगुणान् कथं नियमयस्येतान् न नाशोन्मुखान् ।। 193

युद्धे भीमार्जुनयुगसमास्त्वच्चमूनायकानां
नो वर्तन्तेऽप्रतिहतबलो भीष्मकस्त्रातुमुग्र: ।
द्रोणो वा त्वां नहि तव सुतांस्त्वच्चमूं तावकीनं
सर्वं राज्यं प्रभवति भवान् संधियत्नं प्रकुर्यात् ।। 194

त्वदुपेक्षा भवेन्नाशकारिणी तव सन्तते: ।
पाण्डवानां तथा सर्वभूतलस्थितभूभृताम् ।। 195

कौन्तेयास्ते तव च तनया विश्रुता: शूरतायां
बाहादर्पानितरसदृशा वंशनाशोन्मुखाश्चेत् ।
युद्धे वैराद्बुधजनततेर्वारणं तान् विनाशा-
न्मुख्यं कृत्यं भवति नृपते रक्ष सर्वान् विनाशात् ।। 196

नत्वा भक्त्या परमविनयेनैवमूचु: सुतास्त्वां
पाण्डोरादौ कृतवसतयो घोरकान्तारमध्ये ।

पश्चाद्गुप्तं चरितसमया अद्य राज्यस्य भागं
न्याय्यं चार्धं सपदि विबुध प्राप्तुकामा वयं स्वम् ।। 197

माता पिता तथा बन्धुर्देवः सर्वं त्वमेव नः ।
क्षन्तुमर्हसि दोषांस्तान् येऽस्माभिश्चरिताः पुरा ।। 198

एवं वाच्याः कुरुकुलपतेः सन्निधावस्मदीयै-
वक्यैः स्पष्टैर्विनयसहितैः सभ्यवर्याः सभायाम् ।
अद्यास्मभ्यं समुचिततरो राज्यभागस्य दाना-
त्कोऽन्यो मार्गः कुरुजनपतेः स्यादिति प्रोच्यतां नः ।। 199

धर्मे श्लाघ्ये पतति महिते दुर्गतिं प्राप्य सत्ये
साह्याभावादधिकबलवत्पापकापट्यभग्ने ।
तूष्णींभावो भवति विपदे धर्मपारंगताना-
मीशोऽवश्यं जयति सततं धर्ममुद्धृत्य शक्त्या ।। 200

जानासि त्वं समरभयदं धर्मसूनोश्च शौर्यं
सत्ये धर्मे परमनिरतिं त्वय्यनन्यां च भक्तिम् ।
जानासि त्वं प्रधनभयदां तां गदां वायुसूनो-
र्जानासि त्वं समरभयदं गाण्डिवं शक्रसूनोः ।। 201

आजन्मनः क्रोधमशिक्षितः स
धर्मात्मजः क्रोधवशो भवेच्चेत् ।
सप्तार्णवा ऐक्यमुपेयुरेते
परिभ्रमेयुः कुलपर्वता द्राक् ।। 202

कौन्तेयास्ते सुविनयधनाः शान्तशूराश्च युष्म-
त्पादाम्भोजार्चनरतधियः सन्धिमेवाश्रयन्ते ।
नो चेत्सन्धिस्तव तु रुचये युद्धसेवाद्रियन्ते
वर्त्मद्वन्द्वे तव हितकरं यत्तदावेदय त्वम् । 203

कपिध्वजसुशोभिते सिततुरङ्गमोढे रथे
    तुरङ्गमसुचोदके मयि च फल्गुनें सुस्थिते ।
गृहीतपृथुगाण्डिवे गुणनिनादकारिण्ययें
    प्रकुर्वंति चमूवधं न तव दुःखमन्यादृतम् ॥ 204

हर्षोत्कर्षं सदसि विबुधा विस्मिता एवमूचु–
    र्गोविन्दोक्तं निरुपममिदं सर्वसंमोदयोग्यम् ।
संसद्यस्यां न हि नयसूधीराक्षिपेद्योऽच्युतस्य
    मोघं वाक्यं बहुहितकरं पक्षयुग्मस्य कोऽन्यः ॥ 205

उपदेशं मुनीनामप्ययं मम सुतोऽबुधः ।
न शृणोतीति मे दुःखमिति वृद्धनृपोऽवदत् ॥ 206

इत्युक्तं धृतराष्ट्रेण वचः श्रुत्वा जनार्दनः ।
पुनः पुनरुवाचेदं वचः सर्वहितप्रदम् ॥ 207

सुरासुरा न प्रभवन्ति पाण्डवा–
    न्रणे विजेतुं किमुतान्यशात्रवाः ।
अतो न युद्धं करणीयमात्मनः
    सुतैर्युतस्त्वं कुरु सन्धिमेव तैः ॥ 208

त्वदीयपुत्रा गुरवी महीभृतः
    क्व चार्जुनः क्व प्रधने धनञ्जये ।
गृहीतचापे सति चन्द्रशेखरो–
    प्यलं न तं भोः प्रतियोद्धुमुद्धतम् ॥ 209

श्रुत्वा भीष्मं मुरहरिवचो भीष्म ऊचेऽग्रसूनुं
    त्वत्तातस्य प्रियतमवचः सम्यगाकर्णय त्वम् ।
श्रीकृष्णो यद्धितकरवचः प्रोक्तवांस्तच्च राजन्
    क्षिप्रं युद्धाद्विरम सकलं संक्षयं संनियच्छ ॥ 210

पितृपितामहदेशिकतापदस्थितमदीयवचो हितमादरात् ।
शृणुदुरात्मक संश्रयणं त्यज व्रज सुखं च सुयोधनभूपते ॥ 211

अथोवाच श्रीमान् कुरुकुलपतिः स्वाग्रतनयं
हरिं श्रित्व ज्येष्ठं सहजमनघं सान्त्वय सुखम् ।
लभस्व त्वं स्यान्नः सकलकृतिसिद्धिः करगता
भवेन्नो चेत्तथ्यः कुरुकुलविनाशोऽप्रतिहतः ॥ 212

सुयोधन उवाचेदं दृष्ट्वा कृष्णं पितामहः ।
पितान्ये मां सुनिन्दन्ति त्वं च निन्दसि केशव ॥ 213

पाण्डवा मात्स्यपाञ्चालपाण्ड्यादिनृपसंयुक्ताः ।
संनद्धा घोरयुद्धाय न वयं पुरुषर्षभ ॥ 214

विपदां पाण्डवानां स धर्मजो मूलकारणम् ।
द्यूतव्यसनतः सत्यं स्वयं नष्टः स माधव ॥ 215

स्वप्नो राज्यविभाग एव सहजप्रत्येकराज्यश्रियः
स्वप्नः पालनमाहवेन च विना सूच्यग्रमात्रं भुवः ।
खण्डं नैव ददामि भावि समरे बाहाबलेनैव सं-
क्रान्ती राज्यपदस्य निश्चितमिदं श्रीकृष्ण नाध्वेतरः ॥ 216

श्रुत्वा स्पष्टमिदं सुयोधनवचः किञ्चिद्विहस्य स्थितः
सद्यो नूतनकान्तिसंभृतनिजास्याब्जोऽभवत्केशवः ।
हित्वानन्तरुषोज्वलास्यभयदः स्वां पुण्डरीकाक्षतां
धृत्वा पुष्पितशोणपद्मसदृशं नेत्रद्वयं सोऽवदत् ॥ 217

युद्धायैव सुसन्नद्धो यदि युद्धे समागते ।
प्रदर्शय स्वसामर्थ्यं त्वत्सामन्तसुहृद्वृतः ॥ 218

नापाराद्धोऽहमार्याणां पाण्डवानामिति त्वया ।
उक्तं त्वत्कृतदुष्कृत्यान्यनन्तानि वदाम्यहम् ।। 219

दत्वा विषं भीकरदन्दशूकै–
दंष्टान् विधायाम्भसि पातयित्वा ।
दग्ध्वा च लाक्षागृहमन्यमार्गै–
स्तान्हन्तुमुद्योगयुतोऽभवस्त्वम् ।। 220

धर्माश्रयास्ते धृतिमाप्तवन्तः
स्वास्थ्यश्रियं सम्यगवाप्तवन्तः ।
स्थिताः, पुनस्त्वं कपटेन तान् दु–
र्द्यूतेन सम्यग्व्यथितानकार्षीः ।। 221

त्वया कर्णेन चोक्तानि दुष्टवाक्यानि संसदि ।
सर्वावाच्यानि पाञ्चाल्या अवमानममानुषम् ।। 222

श्रुत्वा वाक्यं श्रीहरिप्रोक्तमेवं
क्रुद्धो मित्रैः कर्णमुख्यैः सगर्व्यैः ।
भूपालैर्दुर्योधनस्त्यक्तकृष्णः
प्रत्येकं स्वं मन्त्रगेहं विवेश ।। 223

मत्ता किं धरणीपतित्वमखिलं संवीक्ष्य दुर्योधनो
बुद्धिभ्रंशमुपेत्य लोभविकृतो मात्सर्यसंपूरितः ।
औचित्येन विना गतस्तदनु ते सर्वे गता भूधवाः
को हेतुर्बहवोऽतिमत्सरयुतास्तेषां दुराशाहताः ।। 224

मत्त्वैवं हृदये सदेशिकवरो भीष्मोऽवदत्केशवं
सर्वेषां समुपागतोऽस्ति समयो नाशावहो भूभृताम् ।
काले संनिहिते विनाशजनके व्यत्यस्तबुद्धिर्भवे–
द्रोद्धुं कोऽलमभीष्टकार्यनिरतं निम्नाभिगम्यं पयः ।। 225

कृष्णोऽवदत्संक्षयहेतुरेष
दुर्योधनो गोत्रयशः प्रवृत्तेः ।
वंशस्य रक्षाकरणार्थमर्ह–
त्युत्सर्जनं द्राग्जननप्रवृद्धैः ।। 226

एवं कंसो जनकहृदयं पीडयन् धर्मनाशं
कुर्वंस्तस्थौ प्रमुखसुजनावेदितस्तं दुरन्तम् ।
दुष्टं हत्वा सकलजननं तस्य लोकं समावं
यद्वच्छित्वा कलुषपिशितं पाति देहं सुवैद्यः ।। 227

एवं त्यागं तव हतसुतस्यापि भूपेन्द्र कर्तुं
शीघ्रं यत्नो यदि सुचरितः सर्वपीडानिवृत्ताः ।
संपत्स्यन्ते तव कुलयशो रक्ष्यते पाण्डुपुत्रा-
स्त्वत्पुत्राश्चामितसुखयुताः सख्यमाप्त्वा वसेयुः ।। 228

अशक्ताः शक्ता वा तव तनयमूलोग्रविपदः
सुताः पाण्डोः पूर्वं कथमपि सहन्ते स्म सुचिरम् ।
गतं पूर्वं वृत्तं तव निकटमद्यास्म्यधिगतो
विधातुं सन्धिं तेऽनुमतिमथवा ब्रूहि विमतिम् ।। 229

पश्चाद्गान्धार्यपि निजसुतं धर्ममार्गं च नीतिं
सन्धेर्लाभं प्रधनविपदं तं समश्रावयत्सा ।
भीकृद्वाक्यैरपि हितकरैः सामवाक्यैश्च सर्व–
स्तस्या यत्नोऽभवदफलदो भस्महोमः कृतो वा ।। 230

हितोपदेशं जननीकृतं तं
शुश्राव नैवाधरुचिः स पुत्रः ।
पित्तेन दूने रसने सितापि
तिक्तायते संज्वरितस्य सम्यक् ।। 231

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक 8528

ब्रूते स्माथ स सात्यकिः कुरुपतिं भीष्मं गुरुं कौरवै-
बंद्ध्वा कृष्णमनिन्दितं स्वसहजान् कुन्तीसुतानाहवे ।
जेतुं या क्रियतेऽघदा कृतिततिः सा स्यात्स्वकीयापदे
यद्वद्वस्त्रनिगूहनं जडधियामग्नेः स्वहानेः पदम् ॥ 232

श्रुत्वेदं विदुरोऽवदत्कुरुपतिः त्वत्सूनवः श्रीपतिं
पूतं ख्यातपराक्रमं तु मनुजं सम्भाव्य तद्बन्धनम् ।
कर्तुं यत्नयुमा भवन्ति विपदे लक्ष्यं त एवानुगै-
र्विष्ट्वाग्निं शलभा व्रजन्ति निधनं यद्वत्तथाऽ संशयम् ॥ 233

क्रुद्धा मह्यं कुरुनृप सुतास्तेऽखिलाः क्रूरचित्ताः
पापं कर्तुं विहितकृतयो मत्सरग्रस्तचित्ताः ।
दुःसंकल्पा अहितगतयो दुर्जनाः सर्वरीत्या
वध्या एवेत्यवददनघो वृद्धभूपं स कृष्णः ॥ 234

भूयोऽवोचदसौ प्रभुः स तनयं दुर्योधनं स्वैर्युतं
नालं त्वं ह्यपराद्धुमात्मज हरौ व्यर्थस्त्वदीयोद्यमः ।
कः शक्तः पवनं ग्रहीतुमनलं हस्तेन भूभृद्वरं
धृत्वा चालयितुं बतास्ति निकटे ते मृत्युरुग्राकृतिः ॥ 235

मूर्खं सुयोधनमिदं विदुरोऽवदत्तं
कृष्णस्य भञ्जनकृतिर्विविधा स्वबाल्ये ।
दृप्तारिदैत्यनिचयस्य नुता समस्तैः
किं ते स्मृतेरपगता गलिता च सा भोः ॥ 236

दृष्ट्वा सर्वान् कुरुपतिसुतानेवमूचे स शौरिः
सर्वे यूयं प्रमदविवशा मां सहायेन हीनम् ।
मत्वा बद्धुं धृतपरिकरा बाधितुं सप्रयत्ना
अन्त्ये काले विकृतधिषणा धीमतामप्युदेति ॥ 237

इत्युक्त्वासौ दर्शयामास भीमं वैश्वं रूपं सर्वतेजोऽभिभावि ।
सर्वे सभ्यास्तेऽभवन् शक्तिहीनास्तद्द्रष्टुं भीसंभ्रमाश्चर्यकम्प्राः ॥238

दिव्यां दृष्टिं प्राप्य कृष्णप्रसादाद्भीष्मो द्रोणः संजयः सन्मुनीन्द्राः ।
प्रीत्या दृष्ट्वा विश्वरूपं विशिष्टं सान्द्रानन्दाम्भोधिमग्ना बभूवुः॥239

पुष्पव्राताः कल्पवृक्षान्निपेतुः शब्दा विष्णोः श्रीर्जयोऽस्तित्यमोघाः ।
सिद्धादीनां भक्तिपूर्वा मनोज्ञा ध्वानाः स्वर्गाद्दुन्दुभीनां श्रुतास्ते ॥240

वृद्धो राजा कुरुकुलपतिर्लब्धदृष्टिः प्रसादा–
द्विष्णोर्भक्त्याद्भुततमवपुस्तस्य संवीक्ष्य हृष्टः ।
धन्योऽस्मि श्रीजगदधिपते त्वत्प्रसादादमोघा–
द्दृष्ट्वा दिव्यं तव वपुरिदं सत्यमित्यब्रवीत्तम् ॥ 241

अन्धं विधाय धृतराष्ट्रमभीष्टसिद्धिं
प्राप्तं पुनर्यदुपतिर्निजविश्वरूपम् ।
कृत्वोपसंहृतमरं मुनिपुङ्गवादी–
नामन्त्र्य सात्यकियुतस्त्यजति स्म गोष्ठीम् ॥ 242

मन्यसे यदि मां शुद्धं मन्यन्ते मां तथा सुताः ।
बान्धवा गुरुवर्याश्च सर्वलोके जना नृपाः ॥ 243

वृद्धस्येदं वचः श्रुत्वावदत्कृष्णोऽयमीश्वरः ।
अप्रामुख्यं स्वकं दोषराहित्यं प्रोक्तवान् स्वयम् ॥ 244

न किमप्यत्र मे कृत्यमतो यामीत्युदीर्य सः ।
भीष्मद्रोणादिसान्निध्ये कुन्तीगेहं हरिर्ययौ ॥ 245

रथादवतरन् गेहे नत्वा कुन्तीं सभक्तिकम् ।
तत्सत्कृतः सुखासीनस्तां सर्वमवदद्धरिः ॥ 246

वृत्तिर्बाहुबलार्जिता समुचिता सत्क्षत्रियाणां ततो
भिन्ना नाभिमतेति नीतिसुधियः, सत्क्षत्रिया वंशगान् ।
धर्मान् पान्ति परित्यजन्तिधिषणाहीनाः पराधीनतां
प्राप्ताः स्वास्थ्यमपेत्य दैन्यनिहतास्ते यान्ति नाशं ध्रुवम् ।। 247

वंशक्रमागतधनुर्धरताविभुत्व—
सन्दर्शनं न हि भवेद्यदि शक्रसूनोः ।
बाहाबलप्रकटनेद्धयशाः स भीमो
युद्धं न वाञ्छति यदि प्रहतं यशो नः ।। 248

स्मर्तव्याः कुरुराजसंसदि कृता द्रोहाः पुरा स्वात्मनां
स्मर्तव्यं विषभोजनार्पणमपां गर्भे च निक्षेपणम् ।
स्पर्तव्यं कपटप्रवर्तनकृतं द्यूतं महानर्थदं
स्मर्तव्या सदसि प्रवर्तितसतीकेशावमर्शोद्धतिः ।। 249

सन्देश एषोऽसि मदात्मजानां
बाचार्पणोयः सदयं त्वया मे ।
कुन्त्येवमुक्त्वा परिरभ्य कृष्णं
तं गन्तुमाशोर्वचसानुमेने ।। 250

:: :: ::

आपृच्छ्य सर्वान् रथमारुरोह
द्रुतं स कर्णं स्वरथे निवेश्य ।
पार्श्वस्थितं तं रहसि प्रियोक्तैः
प्रोवाच चैवं मधुसूदनः सः ।। 251

कर्ण त्वं वृद्धसेवी बुधनुतसुगुणो धर्मवेदी श्रृणुत्वं
मार्ताण्डान्मन्त्रशक्त्या महितवरबलात्कन्यकायां तु कुन्त्याम् ।
संजातः पाण्डवानां जननगतिवशाज्ज्येष्ठ एवासि तेषां
श्रुत्वेदं मत्त इत्थं सकलसुतवराः पाण्डुराजस्य शूराः ।। 252

कृत्वा पट्टाभिषिक्तं सकलकुरुभुवस्त्वां समेत्य स्वकीयैः
श्रीपादाम्भोरुहे ते महितकुरुपतिप्राज्यसाम्राज्यचिह्नैः ।
धर्मेशो भीम इन्द्रप्रियसुत इह सत्क्षत्रमुख्यादिभिः सं-
सेवन्ते सर्वभूपैः सह विभवयुतः पालय क्षोणिचक्रम् ।। 253

पाञ्चालराजपुत्री च सेवते त्वां पतिव्रता ।
कर्ण त्वं पाण्डुसूनूनामग्रचो भूत्वा वसेः सुखम् ।। 254

कृष्णोक्तं स निशम्य सूर्यतनयः प्रोवाच तं मज्जने-
र्वृत्तं मे विदितं प्रसूय जननी संत्यज्य नद्या जले ।
याता मां करुणातरङ्गितमनाः सूतः स्ववेश्म स्वयं
नीत्वा मां परिपोषणाय स ददौ पत्न्यै सुताभावतः ।। 255

माता राधा मां पुपोष प्रकर्षा-
दृत्या ह्येतौ जातकर्मादिकं यत् ।
तन्निर्वर्त्य प्रेमपात्रं च कृत्वा
मां भद्रं संरक्षतः स्मातिसक्त्या ।। 256

विस्मृत्य मे सूतकुलप्रसूतिं
स्वीयानुजेभ्यो धृतराष्ट्रसूनुः ।
प्रेम्णाऽधिकं मां प्रसमीक्ष्य भूपः
स्वेनैव तुल्यं गणनां विधत्ते ।। 257

संभाव्य मामर्जुनतुल्यमाजौ
सर्वात्मना स्वीयजयस्य सिद्धचै ।
मय्येव विश्वासमतीव गाढं
निर्माय मां न त्यजतीश्वरोऽद्य ।। 258

हितोपदेष्टासि कृपार्द्रचित्त
क्षमस्व मां मद्रुचये भवेन्नो ।

मत्पोषकत्याग इदं रहस्यं
मज्जन्मनो रक्षितुमर्हसि त्वम् ॥ 259

धर्मात्मजः स यदि मां प्रथमं सुतं ते
जानाति चेन्न वसुधां परिरक्षतीमाम् ।
धर्मैकमूर्तिरनघः स धरां समग्रां
मान्याग्रणीरवतु भूजनपुण्यवृद्ध्यै ॥ 260

चत्वारः स्वयमृत्विजोऽनुजवराः कर्मोपदेष्टा भवा–
न्संग्रामाध्वरदीक्षितो यमसुतः कृष्णा गृहीतव्रता ।
गान्धाराः पशवः सतीपरिभवक्लेशोपशान्तिः फलं
संप्रीत्या वितनोतु धर्मतनयः संग्रामयज्ञं गुरु ॥ 261

पुण्यभूमौ कुरुक्षेत्रे धर्मजाचरिते मखे ।
रणरूपे प्रविन्देयुर्मादृशाः सद्गतिं हरे ॥ 262

श्रुत्वा सूततनूजवाचमवदद्दामोदरः सोऽनघो
मद्वाक्यस्य निराकृतेर्भवति ते सन्तापभारः परः ।
मात्सर्यं त्यज नार्जुनं जयसि ते मृत्युर्भवेदाहवे
पथ्यं वच्मि न सांप्रतं भवति ते मद्बोधनोल्लंघनम् ॥ 263

तूणीरद्वयसंयुते भुजबलानन्ये स्वकं गाण्डिवं
धृत्वा स्यन्दनचोदके मयि सति श्रीफलगुने संयुगे ।
कौरव्यानतिनिर्दयं बलयुतान् हत्वा विजृम्भत्ययं
कर्णं त्वं प्रतियोद्धुमुग्रचरितं त्वं नैव शक्तो भवेः ॥ 264

आकर्ण्य कृष्णवचनं रविसूनुरेवं
प्रोवाच घोरसमरे कुरुपाण्डवानाम् ।
जेष्यत्यवश्यमनघो यमसूनुरेवे–
त्येतन्ममास्ति विदितं शकुनैरमोघैः ॥ 265

सात्यकिं स्वरथारूढं कृत्वा पाण्डुसुतांस्ततः ।
द्रष्टुं स निर्ययौ कृष्ण उपप्लाव्यपुरं प्रति ॥ 266

संश्राव्य कर्णं निजजन्मवृत्तं
योक्तुं समर्थैः सह तं स्वयत्नात् ।
नियन्तुमुग्रात्समराच्च भव्या-
दुवाच कुन्ती हितबोधबुद्धया ॥ 267

कन्यायां मयि सूर्यदेवकृपया मन्त्रप्रभावात्सुत
त्वं जातोऽसि न सूतसूनुरसि हे कर्णाग्रजो मे सताम् ।
पुत्राणामत एव पाण्डुनृपतेर्मान्यात्मजानां प्रभु-
र्भूत्वा श्रीधृतराष्ट्रसूनुनिचयस्यापि क्षमां पालय ॥ 268

कुन्तीबोधानन्तरं सूर्यबिम्बा-
देवं वाक्यं निर्ययौ कर्ण वाक्यम् ।
कुन्तीप्रोक्तं सत्यमेवास्ति बोधं
तस्याः श्रोतुं त्वं समर्हस्यमोघम् ॥ 269

वाक्यं चैतत्कर्ण आकर्ण्य कुन्तीं
प्रोवाचैवं सत्यमेव त्वयोक्तम् ।
नालं त्यक्तुं निश्चयं प्राक्कृतं मे
सेवां कर्तुं संगरे कौरवाणाम् ॥ 270

विख्याते विजये लोके ज्येष्ठो भ्राता तवेत्यहम् ।
त्वद्बोधात्संगतस्तेन भवेयं भीरुतास्पदम् ॥ 271

उडुपत्वेन मां श्रित्वा तितीर्षुं युद्धसागरम्
नृपं त्यक्तुं न शक्नोमि स्वाराज्यावाप्तयेऽप्यहम् ॥ 272

निश्चयोऽयमहार्यो मे संयुगे हन्मि फल्गुनम् ।
न हन्मि चतुरो भ्रातॄंस्तद्भिन्नान् प्रीतये तव ।। 273

मया सह सुताः पञ्च मां विना पञ्च ते सुताः ।
सुतषट्कं कदापि स्यान्नो मातः शृणु मे वचः ।। 274

कर्णेनोक्तं वाक्यमापन्नकुन्ती श्रुत्वा दुःखाम्भोधिमग्नाऽवदत्तम् ।
रक्ष त्वं त्वत्संगरं भावियुद्धे कोऽलं धातुर्निर्णयं प्राङ्नियन्तुम् ।। 275

0 0 0

उपप्लाव्यं गत्वा दनुजदमनो धर्मनृपति–
प्रधानैः सोदर्यैर्विधिवदनघः प्राप्य रचिताम् ।
सपर्यां तत्रत्यानुचितविधिनाऽऽदृत्य सदयं
विराटाद्यैर्युक्ते सदसि वचनं सोऽवददिदम् ।। 276

उद्धता धार्तराष्ट्रास्तेऽशृण्वन्नैव वचो मम ।
सन्धि साधयितुं प्रोक्तं यतस्ते नाशनोन्मुखाः ।। 277

इत्युक्त्वा पुण्डरीकाक्षो विश्रान्त्यर्थं ययौ गृहम् ।
रात्रौ मन्त्रगृहे कृष्णेनानुजैः सह सुस्थितः ।। 278

युधिष्ठिरोऽवदत्कृष्णं कथयस्य कथं तव ।
गान्धारैः स्वीकृतं दौत्यं किं फलं साधितं त्वया ।। 279

युद्धं निषिध्य सुदृढं प्रतिपाद्य सन्धि
न्याय्यं च तद्धितकरं वचनं मयोक्तम् ।
दुर्योधनो हतमना बधिरान्धको वा
नाकर्णयन्न च तदर्थमपश्यदुग्रः ।। 280

पिता स धृतराष्ट्रभूजनपतिः स दुर्योधनं
हितं तत उपादिशद्बहुविधैरुपायैर्मुहुः ।

हितं च समुपादिशन् बहव आर्यवृद्धा दृढं
तथापि विमुखोऽभवत्स निकटमृत्युरत्युद्धतः ॥ 281

भावानेतांस्थविरजनताऽऽवेद्यमानान्हितार्था-
नश्रुत्वासौ ज्वलनसदृशः सोदरैः स्वीयमित्रैः ।
तत्याज द्राक्समितिमथ संबोधितोऽपि स्वमात्रा
नो शुश्राव प्रलयसमये रोचते नो हितोक्तिः ॥ 282

यदा युद्धायैव प्रबलधिषणां तत्कुरुनृपो
बबन्धात्यंतं तं भयदवचनैः सामवचनैः ।
अधिक्षेपैर्नेतुं सुगतिमखिलांतान् मम कृतो
ज्वरेऽप्युग्रे यत्नोऽगद इव निरर्थः समभवत् ॥ 283

अतो युद्धं सुकर्तव्यं नान्योपायः फलप्रदः ।
शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः ॥ 284

श्रुत्वेदं धर्मराजस्तं कृष्णमेवमुवाच सः ।
जानासि सोदराणां मे चित्तं च कुरुभूभुजाम् ॥ 285

चित्तं च भीष्ममुख्यानां ज्ञातमेव त्वया हरे ।
युद्धं भात्यनिवार्यं मे तथाप्यन्या सृतिर्न किम् ॥ 286

श्रीकृष्णोऽवदद्य कापि सरणिर्युद्धादृते नापरा
दुष्टो दुर्विनयः सुयोधननृपः शुश्राव नो मे वचः ।
पथ्यं सर्वहितैषिणोऽस्ति निकटे दुर्वारनाशो महा-
न्राज्ञां कृत्यमभूत्कृतं न सुगतिर्मे भाति कापीतरा ॥ 287

दुष्यन्तचरितम्

श्रीययातेः सुतः पूरुः सकलावनिपोऽभवत् ।
वंशकर्ता सुतो जज्ञे कौसल्यायां ततोऽनघः ।। 1

जनमेजयनामासावश्वमेधत्रयं चरन् ।
प्रख्यातोऽभूत्ततोऽनन्तानाम्न्यां जज्ञे महायशाः ।। 2

प्राचीन्वांस बभूवार्यः सार्थनामा पराक्रमी ।
उदयाचलपर्यन्तां दिशं प्राचीं जिगाय सः ।। 3

ऋक्षात्तद्वंशजाज्जातो ज्वालानाम्न्यां स्त्रियां नृपः ।
मतिसारो महायज्वा सत्रयागं य आचरत् ।। 4
सरस्वतीनदीतीरे वर्षाणि द्वादश क्रमात् ।
निष्ठायुतो विधिप्रोक्तदक्षिणाभिः समृद्धिभिः ।। 5

यागे श्रीमतिसारभूपचरिते तस्मिन् रता सा नदी
तं जग्राह पतिं त्रसोऽजनि तयोः पुत्रो महावीर्यवान् ।
कालिन्द्यां निलिनोऽभवत्त्रसमहाराजान्महाधीनिधिः
तस्याभूच्च रथन्तरीति महिषी भव्यैर्गुणैर्भूषिता ।। 6

दम्पत्योश्च तयोर्निरन्तरतपोभाग्यं बभौ वीर्यवान्
दुष्यन्तः स महौजसा विलसितो निःसीमसत्त्वाञ्चितः ।
बाल्ये कृष्णमृगार्भकानिव वने जग्राह सत्वान् बली
शार्दूलान् शरभांश्च केसरिवरान् खड्गान् वराहादिकान् ।। 7

नृपवरोऽप्रतिमो दृढयौवनो–
ऽधिकबलोऽद्रिवरान् सह पादपैः ।

निजभुजाबलतः सुविपाटयन्
नगशिखालिषु सोऽक्षिपदद्भुतम् ॥ 8

दुष्यन्तोऽनन्तवीर्यः सकलदिगधिवसद्दन्तिसीमान्तरम्य-
क्षोणीचक्रं समस्तं पवनदिनकरांश्वाद्यभेद्यातिघोरैः ।
सान्द्रारण्यैः परीतं स्ववशगमकरोच्छ्यामकं सस्यवारैः
शत्रूणां दुर्निरीक्ष्यः स च विमलयशाः संबभौ साम्यहीनः ॥ 9

तस्मिन् राजनि सर्वोर्वी ववृधे धर्ममार्गतः ।
प्रजावृन्दे रुजाशोकातंकनाशैर्विना सदा ॥ 10

दुष्यन्तो मृगयाविनोदनिरतः सूर्याश्वसंस्पर्धिभि-
र्वाहैर्युक्तमधिष्ठितो गुरुरथं संवेष्टितो मोदतः ।
आजानेयहयाधिरोहणचणैर्वीरैर्भटैरुत्तमैः
चापैः शक्तिकृपाणकुन्तनिवहैर्युक्तैर्वनं प्राविशत् ॥ 11

दुष्यन्तेशमहोग्रमन्थनगराट् सिन्धुं महोग्राटवी-
रूपं सत्वभयप्रदोग्रनिनदैः सम्यङ् ममन्थाधिपः ।
सिंहव्याघ्रगजादिसत्वनिवहं दूरस्थितं मार्गणै-
र्हन्ति स्मातिसमीपसुस्थितमृगान् हस्तस्थघोरासिना ॥ 12

नैकान्वन्यमृगान्निहत्य जनपे क्रूरान्जिघांसुः परान्
दूरं गच्छति तत्पदातिनिवहः श्रान्तः पिपासार्दितः ।
तं नाभूदनुसर्तुमुत्तमजवाश्वाकृष्टयाने स्थितं
तस्मात्तत्र च तत्र विश्रमधिया तस्थौ वने भीकरे ॥ 13

पुरोहितैरमात्यैश्च युक्तः कतिपयैर्नृपः ।
गत्वापश्यद्वनं रम्यं मालिनीतीरवर्ति तत् ॥ 14

यद्वराज फलैः पुष्पै रम्यगुल्मलतादिभिः ।
अतिशेते स्म यच्चैत्ररथं खाण्डवमुज्ज्वलम् ॥ 15

आकृष्टे वनशोभया नरपतौ शान्तं प्रविष्टे वनं
तत्रत्या लतिकाङ्गना मृदुमरुल्लूनप्रसूनाक्षतैः ।
भान्ति स्माविरतालिसञ्चयरवश्रव्योक्तिभिर्मोदतो
भव्याशीर्वचनप्रदाननिरतास्तद्रूपचर्याय वा ॥ 16

मृगयाश्रान्तभूपाय यथा स्याच्छ्रमवारणम् ।
तथाऽवहन्नदीशीतपवनालिर्मनोहरा ॥ 17

गत्वा ददर्श पुरतः सहकारवृक्षा-
न्केतक्यशोकसुतरून् सुरदारुपङ्क्तीः ।
रम्यान् पुरस्थकदलीवरचूतवृक्षान्
शुश्राव कोकिलशुकालिरुतानि भूपः ॥ 18

गामं गामं वनभुवि नृपोऽपश्यदत्यन्तपूतं
श्रीकण्वस्याश्रममविरतं श्रव्यरावैः प्रपूर्णम् ।
तत्रत्यश्रीद्विजवरगणैः पठ्यमानश्रुतीनां
स्वाहाशब्दैः प्रयतहविषां श्रौतवह्न्यर्पितानाम् ॥ 19

न्यायाभिज्ञैरविरततर्कैः शास्त्रवादैरमूल्यैः
मीमांसाज्ञाविरलविहिताम्नायगोष्ठीनिनादैः ।
वेदान्तार्थप्रवचनपरप्राज्ञभाष्यप्रबोधैः
श्रौताभिज्ञैरविरततपोनिष्ठितैर्ज्ञैः प्रदीप्तम् ॥ 20

कन्या दृष्ट्वा श्रीविलासे जयन्तं
श्रीदुष्यन्तं सार्वभौमं विदित्वा ।
उक्त्वा तस्मै स्वागतं क्षेममादौ
तं पप्रच्छात्यन्तभक्त्या विनीता ॥ 26

बभाषैवं भूपो वयमिह मुनीन्द्रं निजपदे
समायाता द्रष्टुं क्व स मुनिवरेण्योऽद्य सुभगे ।

इदं श्रुत्वा वाक्यं प्रभुवर फलेभ्यः स गतवान्
समागच्छत्यद्य त्वदुपगतिवार्ताश्रवणतः ॥ 27

अतोऽर्हस्यत्र त्वं सदयमधिप स्थातुमनघ
क्षणं कालं प्रीत्येत्यभिहितवती सा स्थितवती ।
लताङ्गी संप्रीतो मधुरवचनैस्तद्विरचितै–
र्विदित्वा तां कन्यां द्युतितरलमृक्षं भुविगतम् ॥ 28

दिव्यलक्षणलक्षितां स विलोक्य मन्मथसायकं
सञ्चलद्धृदयोऽवदल्ललिताङ्गि कस्य सुतासि भोः ।
दिव्यरूपविलासविभ्रमलक्षणावलिराजिते
त्वं किमत्र वने वसस्युटजे वदास्य महामुनेः ॥ 29

श्रुत्वेदं भूपवाक्यं सावदत्कन्याब्जलोचना ।
कण्वस्य धर्मरूपस्य विद्धि मामात्मजां नृप ॥ 30

श्रुत्वेदं वचनं नृपः स्वमनसि प्राज्ञः स मेने यथा
कन्येयं यदि सन्मुनीन्द्रदुहिता किं बद्धमस्यां मनः ।
आर्यं मे न विभाति सत्यवचनं प्रोक्तं यदद्यानया
शश्वद्ब्रह्म सुनिष्ठितः स मुनिरित्यार्यो बुधैः कथ्यते ॥ 31

जन्मोदन्तं स विविदिषुः कन्यकाया यथार्थं
प्रोवाचैवं कमलवदने त्वं कथं ब्रूहि पुत्री ।
आसीराद्याश्रमनिवसतो ब्रह्मनिष्ठस्य कण्वा–
भिख्यस्यर्षेर्विशदय ऋतं ज्ञातुकामाय मे त्वम् । 32

यथाश्रुतं मया पूर्वं जन्मवृत्तं ममाधिप ।
कथ्यमानं तथा पित्रा कस्मैचिन्मुनये श्रुणु ॥ 33

विश्वामित्रोऽनघमुनिवरो राजपूर्वर्षिभावो
ब्रह्मर्षित्वं कठिनविधिना प्राप्तुकामस्तपस्याम् ।

कुर्वन्नस्ति त्वमपि कुशला गच्छ विध्वस्य तस्या–
मोघां निष्ठामवतु भवती देवराज्यं मदीयम् ॥ 34

इत्युक्ता सावददधिपतिं मेनका देवतानां
भीता भीता विनयसहिता यो वसिष्ठं महर्षिम् ।
सूनोः शोकालघुजलनिधौ मज्जयामास यस्मात्
भीता भीतास्त्वमपि विबुध अप्रधृष्यस्य तस्य ॥ 35

विश्वामित्रस्य मां भोर्निकटमधिपते प्रेषितुं नार्हसि त्वं
येनें क्रोधेन दृष्टाः कुलगिरिततयो भिन्नभिन्ना भवेयुः ।
शुष्येयुः सिन्धुवारास्त्रयमपि जगतां घूर्णतां प्राप्नुयाद्द्रा–
ग्वाता नो संचलेयुर्भयदमुनिवरात् का न भीता कृताङ्गी ॥ 36

तथाप्यहं यते प्रभो तदीयमानसं स्मर–
प्रभावितं तनोतुमित्युदीर्य तस्य सन्निधिम् ।
विहाय मन्दमारुतं सहायकं प्रपद्य सा
जगाम तत्तपोवनं हिमालयाद्रिसन्निधौ ॥ 37

लतान्तभूषणाञ्चिता विहृत्य तत्र तत्र सा
वनान्तरें विलासतो निजाग्रतो ददर्श तम् ।
निरस्तमीनकेतनं तथेन्द्रमानसान्तर–
प्रगाढभीतिकृत्तपस्यतीवनिष्ठितं मुनिम् ॥ 38

सा सारसाक्षी विनयेन तं मुनिं
साकं सखीभीः प्रणिपत्य रागतः ।
प्रचक्रमे तत्सविधे विहर्तुं
सुमापचित्युत्सवसंछलेन ॥ 39

मन्दं मन्दं मुनिवरपुरः संस्थितायां लताङ्ग्यां
सौरभ्याढ्यानिलसुचलितेऽध्रः पतत्यंशुके स्वे ।

कक्षद्वन्द्वं घनकुचयुगं रोमराजिर्वलीनां
त्रित्वं तस्या विवृतिमगमन्सूक्ष्मरम्योदरं च ।। 40

विलोक्य सुन्दरीं मौनी विद्धः कामस्य मार्गणैः ।
धृतिहीनोऽपथं श्रित्वा संगतिं प्राप्तवांस्तया ।। 41

विश्वामित्राज्जातमात्रां सुतां तां
रम्ये तल्पे वालुकायास्तटिन्याः ।
माता तस्या मेनका प्रेमहीना
त्यक्त्वागच्छन्निर्दयं देवलोकम् ।। 42

तपस्तप्तुं तस्मिन् गतवति मुनीन्द्रेऽन्यवसतिं
शकुन्तास्तां बालां मुनिवरतपःशक्तिवशगाः ।
ररक्षुर्हिंस्रेभ्यः पिशितनिरतेभ्यो वनपदे
गरुद्भिः प्रच्छाद्य प्रबलतररागेण सदयम् ।। 43

वयं कुशसमित्फलाहरणहेतुना तन्नदी-
तटस्थवनमेत्य तत्पुलिनतल्पसंरक्षिताम् ।
शकुन्ततिभिर्महीगतमनोज्ञविद्युल्लतां
विलोक्य कृपयाऽऽश्रमं द्रुततरं स्वशिष्योत्तमैः ।। 44

आनाय्य तत्र पृथुकां ललितां शकुन्तैः
प्राग्रक्षितां कतिपयानि दिनानि पश्चात् ।
नाम्ना सुतां समुचितेन शकुन्तलेति
हूत्वा स्वयं तदवनं कृतवन्त आस्म ।। 45

सीमन्तिनीनां गुरवस्त्रयोऽस्मिन्
लोकेऽन्नदाता जनकश्च भीतेः ।
त्राता त्रयस्तेऽध्ययनस्य दाता
पञ्चोपनेता गुरवश्च पुंसः ।। 46

एवं शास्त्रं भीनिरक्षाविधाना-
दस्याः स्थानं प्राप्नुमः सद्गुरुणाम् ।
अस्माभिः संवर्धितैषाऽस्मदीया
पुत्री भव्या चित्ततोषस्य दात्री ।। 47

एवं पूर्वं कण्वनामा महर्षि-
र्विज्ञानैकेनादरात्प्रार्थ्यमानः ।
साकं सम्यग्विस्तरैरुक्तवान्मे
जन्मोदन्तं मत्समक्षं नरेन्द्र ।। 48

शकुन्तलाप्रोक्तमुदन्तमात्मनो
जनैर्निशम्य प्रभुरात्मनो हृदि ।
तरङ्गितेऽत्यन्तकुतुहलेन
व्यचिन्तयच्चैवमनिन्दितात्मवान् ।। 49

मुनेः कन्येतीयं विमुखहृदयोऽस्म्यद्य सुदृढं
स्वगोत्रप्रख्यातिं सुविशदमकार्षीन्मम शुभा ।
लताङ्गीयं क्षत्रान्मम जनिरभूदित्यकलुषा
समुत्पन्नास्यां मे रतिरभिनवा संगविषये ।। 50

मदनातुर एव श्रीदुष्यन्तः स्वे तदीयकम् ।
अनुरागं विजिज्ञासुस्तामुवाचैवमादृतेः ।। 51

क्व वल्कलाजिनादृतिः क्व चाटवीफलाशनं
क्व चोटजैकवर्तनं क्व पेशलाकृतिस्तव ।
क्व रूक्षवातसंगतिः क्व च स्थितेः श्रमोऽत्र ते
क्व ते च भूतले शयोऽतिकर्कशेऽम्बुजेक्षणे ।। 52

ऋषीणां वासें किं वससि बहुलक्लेशनिलये
पतिं मां स्वीकृत्योन्नतरुचिरसौधेषु सुभगे ।

महार्हैं रत्नाद्यैः स्थगिततलभागेषु सततं
वसाना राज्यश्रीनिरतिशयसौख्यं व्रज मया ॥ 53

अष्टरीतिविवाहेषु गान्धर्वो राक्षसोऽन्तले ।
क्षत्रियाणां प्रशस्तावित्युक्तं शास्त्रप्रवेदिभिः ॥ 54

गान्धर्वाख्यविवाहेन बह्व्यो राजर्षिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः ॥ 55

विलोक्य तेऽव्याजमनोहरं वपुः
प्रेम्णा सुबद्धं त्वयि मानसं मे ।
तथानुरक्तं मयि मानसं ते
गान्धर्वपाणिग्रहणं श्रयावः ॥ 56

निशम्य राज्ञो वचनं ह्रियाधिकं
नतानना सा वदति स्म कन्यका ।
गृहाण मां मज्जनकाः समागता
यदि प्रविज्ञा वितरेयुरेव ते ॥ 57

समाकर्ण्य वाक्यं तया कन्ययोक्तं
नृपस्तां समुद्बोधयामास तत्त्वम् ।
विवाहस्य गान्धर्वरूपस्य यस्मिन्
न बन्धुर्न दाता न मन्त्रो न चर्त्विक् ॥ 58

वधूवरौ स्वतन्त्रावित्युक्त्वा दुष्यन्तभूपतिः ।
तादृशोद्वाहविषये तस्या अङ्गीकृतिं ययौ ॥ 59

शकुन्तला जगाद तं नृपं महीन्द्र देहि मे
वरं त्वमादितो मयि त्वया प्रसादितं परम् ।
सुतं त्वदीयराज्यसद्युवावनीपतेः पदे
मुदाभिषेक्तुमन्यथा न पाणिबन्ध आवयोः ॥ 60

श्रुत्वेदं वचनं तथास्त्विति वदन्संतोषपूर्वं प्रभु–
स्तत्पाणिग्रहणं विधाय विधिना गान्धर्वरूपेण सः ।
सर्वाभीष्टसुखानुभूतिसहितां तत्संगतिं प्राप्तवा–
नानन्देन जगाम नैजनगरीं सम्यक्समाश्वास्य ताम् । 61

त्वामानेतुं मत्पुरीं शीघ्रगत्या
संप्रेष्यामः प्रीतिपूर्वं प्रधानान् ।
श्रीकण्वर्षेराश्रमं पूरुषांस्त्वं
चिन्ताहीना यापयात्मीयकालम् ।। 62

गते पुरीं स्वामवनीतलाधिपे
महर्षिवर्योऽत्र वनान्निवृत्तः ।
विज्ञाय सर्वं स्वविवाहवृत्तं
कुप्येन्नु किं त्वित्यबला प्रभीता ।। 63

आगत्य सत्कुलपतिः फलपत्रपुष्पै–
र्दर्भैः समिद्भिरमितानतशीर्षयुक्ताम् ।
शृङ्गारभावललितां तनयां समीक्ष्य
वेत्ति स्म सर्वविषयं निजयोगशक्त्या ।। 64

क्षत्रियाणां करग्राहो गान्धर्वविधिचोदितः ।
विचिन्त्यैवं मुदोवाच तनयां स्वामिदं मुनिः ।। 65

त्वद्गोत्रकुलरूपाणामनुरूपो वरो वृतः ।
त्वया वत्से सुतश्चक्रवर्ती त्वद्गर्भजो भवेत् ।। 66

सन्तुष्टोऽस्मि तवाद्य धर्मचरितेनाहं भृशं मत्सुते
धन्यश्चास्मि वरं वृणीष्व शुभदं दास्यामि तं मोदतः ।
इत्युक्ता मुनिनाब्रवीत्तमनघं तातं सुतैवं सती
धर्मासक्तमनोऽस्तु मे मम सुतो वंशस्य कर्तास्तु मे
वंशोऽस्त्वाशशितारकं कुरु कृपामेवं दयाम्भोनिधे ।। 67

श्रुत्वा नैजसुतेप्सितं कुलपतिर्दत्वा च तस्यै वरं
हर्षोत्कर्षयुतस्ततः स विधिना चक्रे प्रवेदी शुभान् ।
काले सर्वविधींस्तदीयजठरे सत्त्वस्य संवर्धकान्
पूर्णेऽब्दत्रय एव सा च सुषुवे पुत्रं मुहूर्ते शुभे ।। 68

जातकर्मनामकर्ममुख्यकर्मसंस्कृतं
तं मुनिर्यथाविधि प्रशस्तकाल आचरत् ।
वर्धते स्म बालकः स चक्रवर्तिलक्षणै-
दीर्घबाहुराजितश्च सिंहसंहनान्वितः ।। 69

उग्राटव्यान्तरगतमहाक्रूरशार्दूलखड्गान्
मत्तेभादीन् सुसुखमचिरं स्वात्मवश्यान् स कृत्वा ।
तानानीयाश्रमपदगतान् वृक्षबद्धान् विधाया-
ऽऽरुह्य श्रीमान् मदकरवरान् शैशवे क्रीडति स्म ।। 70

सर्वान् सत्त्वान्भयदविपिनेऽमोघसत्त्वेन घोरान्
सोत्साहेऽस्मिन् दमयति शिशौ तत्र सर्वे मुनीन्द्राः ।
साश्चर्यास्ते प्रबलमुदितास्तत्प्रभावानुरूपं
तं पोतं श्रीभरतमनघं सार्थनाम्ना महान्तम् ।। 71

आजुहुः सर्वदमन इति कण्वोऽपि तच्छिशोः ।
अखण्डशक्तिसम्पत्तिं तेजश्च परिशीलयन् ।। 72

सन्तुष्य तस्य पोतस्य युवराजपदाप्तये ।
सर्वभूमण्बलस्यापि ध्रुवं समय आगतः ।। 73
एवं विचिन्त्य गदति स्म शकुन्तलां ता-
मत्यन्तशोभनदिने चिरकालवासः ।
तातस्य वेश्मनि न ते ह्युचितः स्वभर्तु-
र्गेहे निवास उचितोऽस्ति सतामणीनाम् ।। 74
अर्हस्यतः स्वतनयप्रवरेण सार्धं
दुष्यन्तराजनगरीं प्रतिगन्तुमार्ये ।

एवं प्रभाष्य स निजाश्रमवर्तिशिष्यौ
योग्यौ न्ययुङ्क्त नगरीमनुसर्तुमेनाम् ॥ 75

पित्राज्ञां शिरसा वहन्त्यनुगता स्वीयेन पुत्रेण सा
पित्रा प्रेषितसत्तपोधनयुता दुष्यन्तराट्पत्तनम् ।
प्रस्थाय क्रमशः समेत्य नृपतिं गोष्ठीगृहेवर्तिनं
सद्भिर्मन्त्रिपुरोहितैः पुरजनैः सामन्तभूपैर्वृतम् ॥ 76

दृष्ट्वा यामनुरक्तिमादृतिमपि प्रीतिं दयां प्राङ् मुनेः
स्थाने प्राप्तवती जनैश्वरवराता नैव पश्यन्त्यसौ ।
एवं चिन्तयति स्म नैजमनसा भूपो न शक्तो नु किं
ज्ञातुं वाञ्छति वेदितुं न किमु मां ज्ञात्वापि कौटिल्यतः ॥77

किं विस्मृतोऽभूज्जनपेन बन्धः
पुरा मया यश्चरितोऽनुरक्त्या ।
जनाधिपा ये बहुकार्यमग्ना
न विस्मरन्त्यात्मकृतीः किमल्पाः ॥ 78

किं वाग्दानविधिं स्वयं कृतमयं संरक्षितुं नेहते
किं दृष्टिप्रसृतिर्नितान्तविषमाऽस्निग्धा च संदृश्यते ।
प्रीत्या भाषत एव सम्यमुपकुर्वीत्वास्ति मे प्रागयं
स्नेहेनेति न कोऽप राजनि सुश्रीर्विश्वासयुक्तो भवेत् ॥ 79

विस्मृतं जनपं कश्चिद्विषयं स्मारयेत्सुखम् ।
न तं विदितवृत्तान्तं यो ज्ञातुं नेच्छति स्वयम् ॥ 80

आगत्य तूष्णीं गमनं न युक्तं
भूपालमुक्त्वा तु मदीयवृत्तम् ।
प्रदर्शयामीति कुमारमेनं
संभाव्य सैवं तमुवाच साध्वी ॥ 81

मृगयाच्छद्मनाऽऽगत्य कण्वाश्रमपदे नृप ।
स्मर्तुमर्हसि चित्ते स्वे मह्यं दत्तं त्वया वरम् ॥ 82

बालं बालार्कसदृशमिमं सर्वगुणाकरम् ।
संस्थापय महाराज्ये यौवराज्ये च ते सुतम् ।। 83

श्रुत्वेदं वचनं साध्वीप्रोक्तं प्रोवाच भूधवः ।
ज्ञात्वा तद्वृत्तमाद्यन्तमज्ञात्वेव कुबुद्धितः ।। 84

न त्वां विजानेऽत्र कुतस्त्वमागता–
स्यौचित्यहीनं गदितुं वचांसि ।
नार्हस्यतस्त्वं चपले समित्यां
गच्छाश्रयं ते यत आगतासि ।। 85

श्रुत्वा वाक्यमुदीरितं नृपतिना निश्चेष्टिता तत्क्षणं
निर्घातेन हतेव चेतनवतो सा निःश्वसन्त्यातुरा ।
कल्पारच्छदनस्रवत्प्रचुरवार्बिन्दूपमं सा सती
बाष्पं कोपकषायिताक्षियुगलस्रस्तं गतं चाधरम् ।। 86

प्रमृज्य हृदये तापं वारयन्ती शकुन्तला ।
लक्षीकृत्य कटाक्षैस्तमुवाचैवं नराधिपम् ।। 87

अज्ञातवृत्तान्त इव ब्रवीषि
न वेत्सि किं मां विदितप्रवृत्तिः ।
अन्यो न वेत्तीति वदस्यसत्य–
मेतन्न युक्तं तव धर्ममूर्तेः ।। 88

वेदा भूतकपञ्चकं च यमराड् धर्मो रविश्चन्द्रमाः
सन्ध्याद्वन्द्वमहः क्षपा नरपते सर्वे पदार्थाः परे ।
पश्यन्तीह नरस्य वृत्तमखिलं ह्येतेषु पश्यत्सु को
वृत्तं गोपयितुं स्वकं कथमयं मर्त्यः प्रभुः स्यात्प्रभो ।। 89

दत्तं त्वया वरं मह्यमेते जानन्ति भूपते ।
यथाहं त्वयि सख्येन वर्ते वर्तस्व मय्यपि ।। 90

सतीं गुणवतीं चानुव्रतां सन्तानशोभिनीम् ।
तिरस्करोति यो मूठो दुर्गति स नरो व्रजेत् ॥ 91

यस्यास्ति दाराः सुगुणाभिशोभिनी
स याति सर्वं गृहमेधिनः फलम् ।
क्रियापरः स्यात्स सूसन्तर्ति व्रजेत्
स एव शान्त्यादिगुणैः सुखी भवेत् ॥ 92

धर्मार्थकामाद्युपलब्धिसाधनं
गृहस्थनीत्यादिकलानिधानम् ।
आचार्यकं सच्चरितस्य शिक्षणे
जाया भवेत्सद्गतिमूलकारणम् ॥ 93

निदानभूता पृथुगौरवस्य
खनिर्गुणानां स्थिरकीर्तिगेहम् ।
चित्तप्रमोदैकनिधानमार्या–
भार्यैव नान्यत्किमपीह पुंसः ॥ 94

क्लेशान्समस्तान्विपदो दुरन्ता–
श्छिद्राणि गेहे च विपन्नगेही ।
सवा तरत्येव सुखान्वितः स्या–
त्पत्नीसुतास्यप्रसमीक्षणेन ॥ 95

भव्यार्धाङ्गी प्राक् परेता द्युलोके
भर्त्रे स्वस्मै सा प्रतीक्षां करोति ।
भर्तारं स्वं प्राक्परेतं द्युलोके
प्राप्तुं पश्चाद्याति भार्या परेता ॥ 96

अतो गृही स्वां गृहिणीं त्यजेन्नो
प्रियां तिरस्कृत्य शुभां गुणाढ्याम् ।

पुमान्विशन् प्राक्प्रयतं कुटुम्बिनी–
गर्भं सुतत्वं समुपैति तत्त्वतः ॥ 97

अंगादंगात्संभवत्यात्मजोऽयं
तातस्येति स्यादहृदस्तस्य चेति ।
तातस्यात्मा पुत्ररूपेण भाती–
त्येवं वेदो व्याकरोति प्रमाणम् ॥ 98

गार्हपत्ये यथा वह्निर्ज्वलत्याहवनीयके ॥
विहतो भाति पुत्रत्वं प्राप्य तातः स्वरोचिषा ॥ 99

छायां स्वकीयां जन ईक्षतेऽमले
जले यथा प्रस्फुटमेव गेहवान् ।
छायां स्वकीयां निजपुत्र ईक्षते
सुतं स्वतो नैव विभिन्नमीक्षते ॥ 100

पून्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः ।
तस्मात्स पुत्र इत्युक्त इति वेदविदो विदुः ॥ 101

दीपः प्रदीपात्प्रभवं समेत्य
यथा ज्वलत्यार्य तथा त्वदीयात् ।
गात्रात्पवित्रात्प्रजनिं हि लब्ध्वा
पुत्रोऽयमत्युज्ज्वलतां सुधत्ते ॥ 102

श्रोतुं स नैच्छद्वचनानि भूपः
शकुन्तलायाः श्रुतिमूलकानि ।
क्वाहं क्व च त्वं क्व च ते तनूजो
दृष्टा मया त्वं न कदापि पूर्वम् ॥ 103

प्रायेण दैर्ध्येण महौजसा त्वं
मत्तुल्यमेनं तनयस्तवेति ।
किं दर्शयस्यद्य तथानृतोक्त्या
यथा हसेयु: सदसि स्थिता मे ॥ 104

ईदृग्वृत्तं विरुद्धं ते न विश्वसिमि भामिनि ।
अक्तं तेऽसत्यवाग्वृत्त्या सत्वरं गच्छ ते जनम् ॥ 105

ईदृशं वचनं घोरं श्रुत्वा राज्ञोऽतिदु:खिता ।
नैराश्यतो मनस्येवमचिन्तयदसौ सती ॥ 106

त्यक्ता जन्मदिने पित्रा त्यक्ता मात्रा च निर्दयम् ।
त्याज्याऽद्य भर्तृपादै: किं धिङ् मे प्राग्जन्मदुष्कृतिम् ॥ 107

चिन्ताग्नितप्तहृदया नितरां गताशा
सम्यक्प्रवृत्तनयनाम्बुकणानपारान् ।
चेलाञ्चलेन गलितान्परिमृज्य साऽक्षणो:
सर्वेश्वरं गतवती शरणं प्रकामम् ॥ 108

नीत्वा स्वीयसुतं स्वमाश्रमपदं गन्तुं यथा सोद्यता
पातिव्रन्यविभूषिता गगनतो वाणी श्रुतैवंविधा ।
अस्यास्ते सुतवर्य एष भरत: स्वीकार्य एवास्ति ते
प्रीत्या सत्यमुवाच भूप महिषी साध्वी तवेयं प्रिया ॥ 109

भूपस्त्वेवमुवाच नैजसदसि श्रुत्वा वचो व्योमतो
जानात्येव न कोऽपि नो परिणयं गान्धर्वरीत्या कृतम् ।
श्रित्वा गुप्तविधानमाश्रमपदे लोकापवादाद्ध्रिया
दृष्टा नैव मया पुरेति ललनाऽसत्यं मया भाषितम् ॥ 110

आकाशवाणीकृतभाषणेन
सुस्पष्टरीत्याऽद्य सभागृहेऽस्मिन् ।
जानन्ति सर्वेऽपि सुतो ममायं
सौभाग्यवन्याश्च शकुन्तलाया: ॥ 111

उदीर्य चैवमात्मजं समुद्वहन् नृपाग्रणी:
महानुरागतो मुहुर्मुहुस्तमालिलिंग स: ।
शकुन्तलां महासतीं सगौरवं ममत्वत:
समादरेण भाषणै: परिष्वजंस्तुतोष स:॥ 112

युवराजपदे पुत्रमभिषिच्य तत: परम् ।
न्यवेशयन्महाराज्यपदं तस्मिन्क्रमात्प्रभुम् ॥ 113

मही राजन्वतीं कृत्वा भरत: सर्वथा चिरम् ।
तन्त्रयित्वा प्रजा: स्वा वा प्रजाराज्यमपालयत् ॥ 114

गङ्गातीरे भरतधरणीजानिरिष्ट्वा सहस्रं
यागादीनां प्रयतमनसा स्वीयपत्नीसनाथ: ।
मान्यान् श्रौते श्रुतिषु कुशलानृत्विजो दानशौण्डो
गोभूदानैर्वसुवितरणैस्तर्पयामास नैकान् ॥ 115

पाण्डवकृतविराटाश्रयणम्

श्रीमन्तः प्रियदर्शना धृतियुता मान्या जनैर्विश्रुता
धीरा मानधनाः स्वदारसहिता गूढप्रवत्त्या कथम् ।
कं मार्गं समुपाश्रिता अरिजनाभेद्यं मदीयाः पितुः
पूज्या अब्दममुं त्रयोदशममी निन्युर्वद श्रीमुने ॥ 1

वैशम्पायनयोगीन्द्रो जनमेजयभूभुजा ।
एवं पृष्टोऽवदद्रूपं तं श्रद्धायुतमादरात् ॥ 2

वने वासं कृत्वा समुचितविधानेन तनया
महीजानेः पाण्डोर्निजसमयभङ्गो न हि भवेत् ।
यथाऽज्ञाताब्दे स्वे वरमभिमतं प्राप्य शुभदं
तथा श्रीधर्मेशादपगतभयास्तस्थुरनघाः ॥ 3

चरन्तः पार्श्वे ये धरणिविबुधा अग्निसहिता
वनेष्वासंस्तेषूत्तमबुधजनेषूत्तमदिने ।
सभायां स्वैः साकं सुखमुपगतेष्वाश्रितनयाः
प्रपत्त्या संयोज्य स्वकरकमले सोदरवराः ॥ 4

विवक्षवः स्वकं कृत्यं भव्यं यमसुतादयः ।
कोविदांस्तान्द्विजान्प्रोचुरित्थं संयमसंयुताः ॥ 5

दुर्योधनेन चरितान्यतिनीचकृत्या–
न्यत्यन्तदौष्ट्यभरितान्यखिलानि पूर्वम् ।
सम्यक् श्रुतानि बत ता विपदः समस्ताः
सोढा भवद्भिरपि घोरवनान्तरेषु ।। 6

त्रयोदशाब्दोऽद्य निगूढवृत्त्या
नेतव्य एवास्ति, सुयोधनाद्याः ।
कर्णादयोऽस्मान्बहुलप्रयत्नै—
र्भग्नप्रतिज्ञांश्चरितुं यतेरन् ॥ 7

वार्तास्मदीया यदि लभ्यते तै—
र्भवेदवश्यं विपदां निधानम् ।
सास्माकमत्यन्तनिगूढवृत्त्या
यथा चरेम प्रयताशिषो नः ॥ 8

प्रयच्छत महाभागास्तथेति प्रणिपत्य ते ।
ययाचिरेऽखिलान्विप्राननुग्रहमपूर्वकम् 9

विषण्णवदनो भूत्वा धर्मजोऽवददापदः ।
निस्तीर्य सुखिनः स्याम बन्धुमित्रैः कदापि किम् ॥ 10

इत्युक्त्वासौ गद्गदध्वानपूर्वं
दुःखाक्रान्ताऽभूत्तदा तत्सगर्भ्याः ।
ते भूदेवास्तं समाश्वासयन्त—
स्तस्थुर्भूपं धर्मजं धौम्य ऊचे ॥ 11

धर्मतत्त्वनिरूपणे गुरुकार्यनिर्वहणे तथा
माननीयगुणाश्रये चतुरत्वराजितभाषणे ।
शास्त्रतत्त्वविवेचने गुरुशेमुषीविभवे नुते
नैव कोऽपि समोऽस्ति ते विबुधाग्रगाद्य धरातले ॥ 12

न युक्तं तव भूजाने दशायां क्लेशसंयुजि ।
शोचितुं गुरुधैर्येण व्यवहर्तुं समर्हसि ॥ 13

अनुकूलावकाशस्य प्राप्तये देवता अपि ।
नाल्पकालं निरैक्षन्त निगूढस्वात्मशक्तयः ॥ 14

निषधगिरिनिवासी गूढ आसीन्महेन्द्रो
हरिरदितिपिचण्डे वामनत्वं प्रपेदे ।
निजवरजनयित्र्या और्व ऊरौ निलीनो
ऽत्रसदधिप सुगुप्तो धेनुकाये विवस्वान् ॥ 15

निगूढवृत्त्या विचरन्त एवं
प्रतीपकाले बहवो महान्तः ।
कालेऽनुकूलेऽरिवधं वितेनु–
स्तथैव शत्रून् जय योग्यकाले ॥ 16

धौम्यस्य वाक्यश्रवणेन सम्य–
ग्यमस्य सूनोर्धृतधीरवृत्तेः ।
विलोचने स्वानुजपुङ्गवेषु
निगूढभावं पततः स्म शीघ्रम् ॥ 17

त्वदीयाज्ञारूपप्रबलतरबन्धैः सुयमित–
स्वकीयावेगोऽभूत्सुरपतितनूजोद्धतकरी ।
विमुक्तिश्चेल्लब्धा कुरुपतिसुताम्भोजवितते:
क्षणे विध्वंसाय प्रभवति यथा स्यात्तव सुखम् ॥ 18

श्रुत्वेदं वचनं तु भीमभणितं श्रीधर्मसूनौ शनैः
स्वस्थस्वान्ततया स्वमौलिचलनं कृत्वा स्थिते ते द्विजाः ।
त्वद्वाञ्छा सफला भवत्विति शुभाशीर्वादपूर्वं पुन–
र्भूयाद्दर्शनमित्युदीर्य सदनं स्वं स्वं गताः सत्वरम् ॥ 19

परिवारस्ततः सर्वो बाह्य आपृच्छ्य धर्मजम् ।
युक्तरीत्या गतः स्वीयं स्थानं सम्यग्विषादतः ॥ 20

अधिष्ठाय रथं साकं द्रौपद्याऽनुजपुङ्गवैः ।
धौम्येन कोशमात्रस्थप्रदेशं धर्मजो गतः ॥ 21

रात्रौ तत्र स्थितः प्रातरिष्टकार्यचिकीर्षया ।
धर्मजोऽवददेवं श्रीवासवात्मजमार्तियुक् ॥ 22

कृष्णयानुगताः पञ्च वयं केनाध्वना सुखम् ।
गूढवृत्त्याऽरिभिर्नैव ज्ञाताः कुत्र वसेम भोः ॥ 23

श्रुत्वेदं वचनं वासवात्मजोऽवददग्रजम् ।
धर्मदेवप्रसादेन वरः प्राप्तः पुरा त्वया ॥ 24

स्वस्वोचितकृतीः कृत्वा धर्मदेवप्रभावतः ।
वत्स्यामो यत्र कुत्रापि शत्रुभिर्नावलोकिताः ॥ 25

अभितः कुरुदेशांश्च पाञ्चालाश्चेदिबालकाः ।
दशार्णशूरदेशाश्च कलिङ्गा मगधा अपि ॥ 26

जनाकीर्णाः सुभिक्षाश्च वासयोग्या अतिस्थिराः ।
वर्तन्ते बहवो ये ते रोचन्ते ते मतास्तु नः ॥ 27

श्रुतोदन्तोऽब्रवीद्धर्मनन्दनो वासवात्मजम् ।
सत्यमेतेषु को देशोऽत्यन्तं क्षेमकरो वद ॥ 28

मत्स्यदेशाधिपो धर्मवर्ती सम्यग्जनप्रियः ।
अदम्यबाहुशक्तिश्च श्रेयसे स्यात्तदाश्रयः ॥ 29

अस्मासु यो यां कृतिमाश्रयेद्य—
द्यद्वेषयुक्तश्च विराटराजः ।
चित्तं ग्रहीतुं प्रभवेदवश्यं
वदेत्स नैजाशयमद्य मां द्राक् ॥ 30

श्रुत्वेदमर्जुनः सम्यक्सविषादं सगौरवम् ।
सवितर्कं तमालोच्याब्रवीदेवं युधिष्ठिरम् ॥ 31

दिव्याकृत्या सौकुमार्येण शोभी
शान्तो दान्तो धर्मचिन्ताप्रसक्तः ।
कारुण्येनात्यन्तकौर्या सनाथः
प्राज्यैश्वर्याखण्डविज्ञानयुक्तः ॥ 32

स्वेच्छामानोन्नतिश्लाघ्यप्रभुत्वादिसमन्वितः ।
कथं वेषेण केन त्वमन्यसेवां करिष्यसि ॥ 33

भ्रातुर्मनसि संक्रान्तं दुःखं ज्ञात्वा धृतिं श्रितः ।
कार्यं प्रस्तुतमुद्दिश्यावदत्तं धर्मनन्दनः ॥ 34

धृतसंन्यासिवेषोऽहं सेवमानो विराटपम् ।
सभ्यत्वमान्यताशोभी तं विनोदयितुं यते ॥ 35

श्रौते स्मार्ते तथा ज्योतिर्विद्यायां प्राप्तवर्णकः ।
योग्यकाले प्रगल्भत्वं प्रदर्श्य प्रीणयामि तम् ॥ 36

पुरस्कृत्य नृपस्याभिरुचिं द्यूतक्रियाविधौ ।
अक्षविद्याप्रगल्भत्वं प्रदर्श्य प्रीणयामि तम् ॥ 37

कलधौतमणिस्वर्णमयाक्षाः सन्ति मे वशे ।
भूपाय तान्प्रदर्श्याहं तं प्रीतं विदधाम्यहम् ॥ 38

विनोदैः प्रमोदं यथाकालमिष्टैः
प्रकल्प्य प्रसादं नृपस्याप्तुमिष्टम् ।
यते, कंकुभट्टाभिधानेन भूत्वा
यदि प्रश्न आयात्यहं धर्मजस्य ॥ 39

सुहृत्त्वेन तस्यान्तिके वर्तमानो–
ऽभवं चेति वच्मीत्युदीर्यानिलस्य ।

सुतं वीक्ष्य चित्तस्य खेदं स्वकीयं
स भूपः प्रहृष्यावदत्तं सगर्भ्यम् ।। 40

सौगन्धिके प्रथितदोर्बलयुक् सलीलं
यक्षान्निहत्य समदान् द्रुपदात्मजायै ।
पुष्पप्रदानविधिना हृदयप्रमोदं
सन्धाय नाल्पनुतिभागभवस्त्वमीड्यः ।। 41

किम्मीरदानवं हत्वा प्रबलं भुजवीर्यतः ।
गतकण्टकमाधाय वनं त्वं कीर्तिमानभूः ।। 42

बकदैत्यं महोदग्रं विजित्यानल्पशक्तितः ।
एकचक्रपुरं सम्यगरक्षस्त्वं जयान्वितः ।। 43

अनन्यविक्रमोपेतो जटासुरमरिं बली ।
प्रबलं दुष्टमाहत्य कीर्त्या वलयितोऽभवः ।। 44

आजन्म त्वं महादर्पप्रागल्भ्यमहितोऽसमः ।
उग्रश्च मां वद श्रीमन् सेवसेऽन्यनृपं कथम् ।। 45

निशम्य वाक्यं यमसूनुनोक्तं
वायोः सुतस्तं वदति स्म सूदः ।
भूत्वौदनं शाकमतीव रुच्यं
कृत्वा विराटाधिपतिं सुसेवे ।। 46

विनूत्नसृष्ट्या रुचिभेदकल्पनां
रसेषु षट्सूत्तमपाकभेदतः ।
कृत्वा न कोऽप्युत्तमपाचको भवे-
त्पुरे यथान्यो मदहं यतिष्ये ।। 47

अनपेक्ष्य कुठारखड्गको
पृथुकाष्ठं करपादसाह्यतः ।
सुविपाट्य तदन्तिकागतं
विरचय्यान्नमरं पचाम्यहम् ।। 48

सूपाध्यक्षे स्थिते, तेन सह वर्तेऽतिमित्रताम् ।
प्रदर्शयन्नहं तस्य प्रीतये स्यां समग्रतः ।। 49

मुखामुखि स्थितो मल्लरंगे मल्लान् समुद्धतान् ।
भिनदम्यात्मभुजावीर्यसत्त्वशक्तिभिरुत्कटः ।। 50

नैकमल्लानहं रंगे प्रत्यर्थी नात्र संशयः ।
मथ्नामि, हन्मि नो लोका यथा स्युर्भीतिकम्पिताः ।। 51

मृगेन्द्रं वा घोरं विपिनमहिषं वा मदयुतं
करीन्द्रं वा मत्तं भयदगुरुशार्दूलमथवा ।
करग्राहं गृह्णन् प्रबलभयदो मग्नकरणं
तथा कुर्वन् हन्मि प्रबलभयकंप्राः स्युरखिलाः ।। 52

वल्लाङ्कयुतो विहृत्य पुर्यां
बहुभिश्चित्रविचित्रवर्त्मभिः ।
यमनन्दनपाचकोऽभवं प्रा-
गिति वक्ष्यामि विराटभूभुजम् ।। 53

भीमेन कथितं भावं श्रुत्वाङ्गीकृत्य धर्मजः ।
विषादघूर्णचित्तेनोवाच श्रीवासवात्मजम् ।। 54

दग्ध्वा खाण्डवमीश्वरं समवलोक्यामर्त्यवीक्षातिगं
वीर्येणोद्धतदैत्यदर्पदलनं कृत्वेन्द्रसंप्रीणनम् ।
संधायार्धमहोन्नतासनमलंकृत्यात्तसंभावन-
स्त्वं मत्स्याधिपतिं कथं नु वससि श्रित्वाब्दकालं बत ।। 55

श्रुत्वेदं वचनं पार्थ एवमूचेऽग्रसोदरम् ।
दैवान्मे वर्तते मार्गः कश्चित्कार्यस्य सिद्धये ॥ 56

यदामरावतीं गतस्तदाहमूर्वशी तु मां
नपुंसको भवत्वमित्यशप्यता ननुग्रहात् ।
परं तु नाकनायको निगूढवृत्तिवत्सरे
फलानुभूतिरित्यनुग्रहादुवाच मे प्रियम् ॥ 57

नृत्यशिक्षणविधौ कुशलोऽहं
मां नियुङ्क्ष्व नृप तत्करणस्य ।
उत्तमान्वयसुतावरशिक्षा-
या महं जनपते कृतहस्तः ॥ 58

द्रौपदीनिकटगौरवशोभी
श्रीबृहन्नल इति प्रथितोऽहम् ।
नर्तने मम समो न हि लभ्यः
कोऽपि पत्तन इति प्रवदेयम् ॥ 59

अर्जुनस्य वचः श्रुत्वा नकुलं वीक्ष्य सोऽब्रवीत् ।
धर्मजोऽनन्तदुःखेन विवशोऽपि धृतिश्रितः 60

मृदुलं रुचिरं वपुर्मनः
प्रबलोदात्तमनन्यशूरता ।
प्रतिभाति तवास्य वीक्षणा—
त्कथमन्यं वद सेवसे नृपम् ॥ 61

नकुलोऽप्यवदद्यमसूनुमिदं
श्रृणु कृत्यमस्ति विदितं मम भोः ।
अहमश्वशिक्षक इति प्रथया
प्रविशामि मत्स्यविभुसंश्रयणम् ॥ 62

अश्वपालनमश्वानां शिक्षणं चाश्वलक्षणम् ।
अश्वरोगचिकित्सां च वेद्मि तन्मानसस्थितिम् । 63

दामग्रन्थ्याख्यया तत्र गतोऽहं विश्रुतिं पुरे ।
धर्मजस्यान्तिके वासः प्राङ्ममेति ब्रवीम्यहम् ।। 64

श्रुत्वेदं चित्तविश्रान्तिं प्राप्य धर्मज उक्तवान् ।
सहदेवं विलोक्यैवमत्यन्तं तप्तमानसः ।। 65

तव दर्शनमद्भुतावहं तव शीलं निरवद्यमार्जवम् ।
तव नैजमहङ्कृतिर्न ते तव नीतिर्विमला मतिः शुचिः ।। 66

अतुला तव मान्यतास्ति ते
दमशान्त्यादिगुणास्तवोचिताः ।
सहजा बत भद्र सेवया
कथमन्यस्य वशे प्रवर्तसे ।। 67

निशम्य वाचं यमसूनुनेरितां
तदीयशोकापनयं समाचरन् ।
विराटराज्ये पशुपोषकार्यकृद्-
वसाम्यहं तज्जनपेन मानितः ।। 68

धेनूनां चित्तवृत्तिं च धेनुरक्षणमुत्तमम् ।
धेनूनां रोगचिह्नानि वेद्मि तद्रोगवारणम् ।। 69

तन्त्रीपालाख्यया वर्त इति प्रोक्तं वचोऽग्रजः ।
युधिष्ठिरः समाकर्ण्य पाञ्चालीमवदत्स ताम् ।। 70

मुग्धे न कार्यमपि नैजमलं स्वशक्त्या
कर्तुं, नितान्तमृदुला सहसे श्रमं नो ।
एकाकिनी न चलितुं प्रभवस्युदात्ता
चित्ते, नु केन विधिना सहसेऽन्यसेवाम् ।। 71

श्रुत्वा धर्मसुतप्रोक्तं वचः सा द्रुपदात्मजा ।
शमनं तस्य शोकस्य कुर्वती तं समब्रवीत् ॥ 72

सैरन्ध्रीवेषमाश्रियाहूता मत्स्यमहीपतेः ।
महिष्या, तां समाश्रित्य मालिनीसंज्ञया युता ॥ 73

एषा सुसाध्वी नहि रोचतेऽस्यै
निन्द्यप्रवृत्तिश्रयणं कदापि ।
यथेति भावं प्रविभाति तस्या
मत्यां तथाहं निवसामि सम्यक् ॥ 74

महिष्या मत्स्यराजस्य तनूं गन्धैर्मनोहरैः ।
सुमैर्माल्यैरनर्घैश्च वासोभिः सुपरिष्कृताम् ॥ 75

कृत्वा स्वशिल्पचातुर्यविश्रुता कृतसेवना ।
प्रीणयामि सदा चित्तं तस्याः सम्यङ्मता दिता ॥ 76

अनुचारिण्यहं भूत्वा सुदेष्णासन्निधौ स्थिता ।
गौरवोचितकृत्यानि कुर्वती निवसाम्यहम् ॥ 77

द्रुपदात्मजया प्रोक्तं स्वकृत्यं भाविवर्तने ।
विराटस्य पुरे श्रुत्वा धर्मजस्तां वचोऽब्रवीत् ॥ 78

अस्मद्वंशं तस्य वृत्तं पवित्रं
तस्यौन्नत्यं रक्षितुं त्वं समर्था ।
पुण्याचारा दुर्जनानां दुरूहान्
ज्ञात्वा सम्यग्जागरित्री भवेस्त्वम् ॥ 79

द्रौपदी प्रत्युवाचैवं सैरन्ध्रीजातियोषितः ।
पातिव्रत्यगुरुत्वे स्वे रक्षेयुः सर्वयत्नतः ॥ 80

अतो मे कृत्यनिर्वाहे पापभीतिश्च गौरवम् ।
पातिव्रत्यं सुरक्ष्याणि मितभाषा समीहिता ॥ 81

श्रुत्वेदं सोदरान् सर्वान्निश्चप्रचमुवाच सः ।
धर्मजो वर्तनं कुर्म एवमुक्तविधाः श्रिताः ॥ 82

उवाच धर्मजः पुनः प्रपूज्य धौम्यकोविदो-
ऽस्मदीयवह्निरक्षणं क्रियेत पाचकादयः ।
महानसस्य पालकास्तथावरोधरक्षका
वसेयुरेव नः प्रियापितुर्महापुरे सुखम् ॥ 83

इन्द्रसेनादयः सूता रथवृन्दैः समं पुरे ।
द्वारकाख्ये वसेयुस्तान्यदि पृच्छन्ति पाण्डवाः ॥ 84

कुत्रेति पाण्डवान्सुप्तानस्मान्द्वैतवने सुखम् ॥
त्यक्त्वागच्छन्न जानीमः कुत्रेति प्रोच्यतां तु तैः ॥ 85

उक्त्वैवं धर्मजः सर्वान्संप्रेष्य प्राप्तनिर्वृतिः ।
बभूव, पाण्डवान्धौम्यः सेवाधर्मानवेदयत् ॥ 86

सेवाधर्मोपदेशस्य श्रवणं विरचय्य ते ।
धौम्याय स्वकृतज्ञत्वं विवव्रुः पाण्डवा मुहुः ॥ 87

यथाकथंचिद्विराटदः समस्ताः
संवत्सरेऽस्मिन्सुविनीतवृत्ताः ।
धृत्या निगूढं परराष्ट्रमेत्य
सोढ्वा श्रमं स्वां पदवीं व्रजेत ॥ 88

संश्रुत्य धौम्योक्तमिमं सगर्भ्या
महोपदेशं विनयावनम्राः ।

अमोघमाशीर्वचनं तदीयं
स्वीकृत्य मूर्ध्ना विदधुः स्वयात्राम् ॥ 89

प्रस्थानकाले नियमेन सोऽग्नि
समुज्ज्वलन्तं सुविधाय धौम्यः ।
काम्यार्चनामप्यवसाय्य सम्यग्
जजाप मन्त्राञ्शुभदान्पवित्रान् ॥ 90

परिक्रम्य ते वीतिहोत्रं च धौम्यं
नमस्कृत्य भक्त्या समं स्वीयपत्न्या ।
सधौम्या दशार्णोत्तरस्यां दिशायां
क्रमाद्याम्यदिग्भागमाश्रित्य जग्मुः ॥ 91

यमुनादक्षिणे तीरे चरन्तो देहपोषणम् ।
चरन्तः कन्दमूलाद्यैरगच्छन्पाण्डवाः क्रमात् ॥ 92

मार्गे ते नैकभेदैर्विलसितमृगसंदर्शनै रम्यगन्धि-
स्वाद्यानेकप्रवृद्धाधिकफलदमहीजातभव्याश्रयेषु ।
विश्रान्ताः पङ्कजानां मृदुसुरभिरजोरेणुसंवासितेषु
प्रीत्या कासारतोयेष्वधिकतरमुदा स्नानपाने चरन्तः ॥ 93

सरितां संगमस्थानस्नानानुष्ठानतत्पराः ।
पादपश्रितगुल्मानां लतानां रामणीयकम् ॥ 94

पश्यन्तः पक्षिणां श्राव्यरुतश्रवणरञ्जिताः ।
गामं गामं क्रमात्सीमां जग्मुर्मत्स्यमहीपतेः ॥ 95

आपृच्छ्य धौम्यं य उवास कस्मि-
श्चित्पर्णवेश्मन्यटवीप्रयाणैः ।
मत्स्येशपुर्याः सविधे वनान्ते
गच्छत्सु शीघ्रं यमजादिकेषु ॥ 96

गात्रानीशतयाऽवदद्द्रुपदजा हन्त श्रमेणार्दिता,
तृष्णाक्लेशकरी भवत्यधिकतः पादाङ्गुलीनां क्षतिः।
जाता, संस्रवणं पदङ्गुलितते रक्तस्य संलक्ष्यते
गम्यस्थानमतीव दूरगमहं गन्तुं न शक्ताग्रतः॥ 97

श्रान्ता द्रौपद्यनुज वसतिर्यत्र कुत्राप्यरण्य-
प्रान्तेऽस्मिन्नो भवति सुकरा श्रान्तकल्पा वयं च।
धृत्वेमां त्वं श्रममगणयन् वोढुमर्हस्यनीशां
पुर्याः सम्यङ्निकटवसतिं फल्गुनेत्यग्रजोक्त्या॥ 98

ऊढ्वा गच्छत्यर्जुने दुर्बलां तां
दूरे सम्यग्दूवपथं गच्छतीडये।
मत्स्याधीशप्रोज्ज्वले पत्तने श्री-
धर्माज्जातः सोदरानेवमूचे॥ 99

रम्याणि वीक्ष्य पटुसंहननानि चास्मान्
विन्दन्ति योग्यतमवेषनिरूपणार्थम्।
गूढाभिधानवरणार्थमुपागतेऽस्मिन्
काले निवास उचितः क्वचिदस्त्रगुप्त्यै॥ 100

श्रुत्वा धर्मजवाचमार्यविजयस्तत्कृत्यमत्युत्तमं
मत्वा तां द्रुपदात्मजां क्वचिदपां तीरे निवेश्योत्तमे।
स्वीयैः साकमसौ स्वकृत्यकरणायोद्युक्त आसीत्ततो
वक्ति स्मार्जुनहस्तसुस्थितधनुः संवीक्ष्य धर्मात्मजः॥ 101

क्वास्मच्छस्त्रास्त्रनिचयं क्व च गाण्डीवमुत्कटम्।
अभिजानन्ति नसर्वान् प्रेक्ष्येमं गाण्डिवं द्विषः॥ 102

महाभोगीवायं भवति नितरां त्रासजनको
भिया लोकस्वान्ते क्वचिदपि निवेश्योऽयमधुना।

विहातुँ मे चित्तं परिचितमिमं नेंच्छति बत
क्वचिन्निक्षेपोऽस्मद्विधिरिति ममास्य स्थिरमतिः ।। 103

वितर्क्यैवं पार्थो मनसि जनितं शोकमधिकं
कथंचित्संत्यज्य श्रितगलितधैर्योऽस्त्रनिचयम् ।।
सुनिक्षिप्य स्थेयं कथमपि न संदेह उचितो
ऽध्रुनेत्युक्त्वा शीघ्रं समुचितपदप्रेक्षणरतः ।। 104

चतुर्दिक्षु विलोक्यैकं प्रेतभूमेस्समीपतः ।
अरण्ये पश्यति स्माऽयं शमीवृक्षं भयंकरम् ।। 105

पक्षिवृन्दसंवृतः परेतभूप्रवृद्धिगः
प्रेतभूतगोचरः प्रपूतिगन्धसंयुतः ।
चित्तसंभ्रमावहश्च सर्वजीविदुर्गमः
स्वास्त्रशस्त्रसंश्रयाय वर्ततेऽत्र पादपः ।। 106

औन्नत्येन च विस्तृत्या निबिडत्वेन भीतिदम् ।
न कोऽपि धृतिमानेतमारोढुमपि वीक्षितुम् ।। 108

शस्त्रास्त्रनिचयो ह्यत्र केशचर्मावृतो दृढम् ।
रचितः शवरूपेण निवेश्यः पुनराप्तये ।। 108

उक्त्वैवं सोदराणां च लब्ध्वाङ्गीकारमुद्वहन् ।
गाण्डिवं स्वं विलोक्यैवं स्वान्ते स्वेऽचिन्तयद्भृशम् ।। 109

अनेनोदग्रेण प्रबलभयदेनाहवचये
हता दैत्याः सर्वेऽम्बरचरविरोधिप्रविततिः ।
जिताऽमुं निक्षिप्योन्नतभयदवृक्षे विधिवशा—
दवश्यं गन्तव्यं नहि किमपि वर्त्मान्यदधुना ।। 110

चापोऽयं दनुजान्ववायभयदोऽभूद्भञ्जतो विद्विषां
देहं चास्य महार्हरत्नरुचिरं चायं कुरूणामभूत् ।
ह्लादायेति स धर्मजोऽमितशुचा चापे स्वकीये गुणं
विस्रस्यैवमुवाच भीमनकुलौ माद्र्याद्वितीयं सुतम् ॥ 111

यक्षांस्त्रिगर्तानजयस्त्वमार्या–
नेनैव चापेन महोग्रबाहो ।
सौराष्ट्रनाथाद्यरयो ह्यनेन
द्रुणेन भग्ना अभवन्प्रवीर ॥ 112

कालिङ्गपाण्ड्याद्यरयो महोग्रा
श्चापेन भग्ना अरिहन्ननेन ।
इति क्रमात्तत्तदनर्घचाप–
स्यैकस्य चैकस्य नुतिं वितेने ॥ 113

ततः स तत्तद्धनुषः प्रकृष्ट–
ज्याबन्धनिर्मोचनसंमतिं द्राक् ।
तान् याचयामास ददुः सगर्भ्या
आज्ञां स सर्वानपि मुद्गरांस्तान् ॥ 114

चापांश्च वर्माणि शरन् सुतीक्ष्णां–
स्तथान्यशस्त्राणि यथोक्तपूर्वम् ।
महोग्रसर्पान् गुरुपेटिकायां
यथा तथा चर्मणि संनिवेश्य ॥ 115

बद्ध्वा प्रपूतेन हृदाऽधिरुह्य
निःशङ्कमुग्रं स शमीमहीजम् ।
संस्तुत्य रुद्रं चतुराननं श्री–
विष्णुं दिशाधीशदिवाकरादीन् ॥ 116

स्तुत्वा दिवं गां च विशेषभक्त्या
सम्यक् च शाखाग्रथितं विधाय ।
निलम्बमानं दृढमस्त्रकूर्च–
मस्त्राधिदेवानिदमेवमूचे ।। 117

हित्वा नरं मां च भवत्स्वरूपं
न दर्शयेतान्यनरान् कदापि ।
अत्युग्रहालाहलशोभिसर्पा–
कृतीर्दधाना भयदा भवेत ।। 118

धार्तराष्ट्रसुतबद्धविरोधो
दुर्दमोद्धतमदप्रभवो यः ।
तस्य कोपवशगास्तनयस्य
स्पर्शनस्य न भवेत कृपार्द्राः ।। 119

अवतरन्स यमस्य सुतस्तरो–
स्तमभिवन्द्य परिक्रमपूर्वकम् ।
समवलोक्य मरुत्तनयं स्वयं
तमनुनीय गतः परिरम्भणम् ।। 120

ससोदरः स्वीयकृतिं निगूढां
विधातुकामोऽखिलग्रोपवर्गान् ।
उवाच मूढानिति संमुखस्थो
वाक्यैरगम्यैः कपटैर्यमात्मजः ।। 121

वृद्धा माता यास्मदीया मृता सा
तत्संस्कारो रोचते नो कृशानौ ।
कालादाद्यादस्मदीयो विधिर्य–
स्तं विश्वासादाचरामः प्रगुप्तम् ।। 122

सन्तुष्टाश्चनिगूढमात्मनि महाशस्त्रास्त्रनिक्षेपणं
कृत्वा, कस्यचिदत्र संस्थितपशोर्लूनाजिनेनापि ते ।
कूर्चं संवृतमारचय्य सुदृढं मत्स्येशराज्ये नु ते
गच्छन्तो नगरीं निगूढवसतेर्युक्ताः स्वसंज्ञा ययुः ॥ 123

जयो जयन्तो विजयाभिधान-
स्तथा जयत्सेनजयद्बलाविति ।
क्रमात्स्वसाङ्केतिकनामनिश्चयं
विधाय ते श्रीद्रुपदात्मजायुताः ॥ 124

स्नान्वामलाम्भसि मुहुः परिपूतनद्यां
मार्गश्रमापनयनिर्वृतिमाप्तवन्तः ।
निर्वर्त्य होमजपदानततीर्विशुद्धा-
स्तस्थुः; स धर्मनृपतिः परिपूतचित्तः ।। 125

तात त्वया वरमनुत्तममर्पितं प्राक्
चित्तेऽनुचिन्त्य समयावनकृत्यभङ्गः ।
न स्याच्च, युक्तसमये कुरु भो यथा स्या-
च्चातुर्यमात्मविपदुत्तरणे तथा नः ॥ 126

त्वां दृष्ट्वा गगनस्थितं मदनुजेष्वत्यन्तवश्यं गते-
षूच्चैर्यक्षवरस्य तत्प्रियतमान्प्राणानहं विक्रमम् ।
धैर्यं, त्वाममितार्तिमानतिभिया दीनो ययाचे भवान्
सर्वं तत्सदयं ददौ प्रियतमैरुक्तैः समाश्वासयन् ॥ 127

विज्ञाप्यैवमनूनभक्तिसहितः फाले कराब्जे स्वके
संयोज्याधिकनम्रताननतशिरा भूत्वा स धर्मात्मजः ।
धर्मानुग्रहतः स्वयं यतिवपुः काषायदण्डी बृसीं
प्राप्तोऽभूत्सपदि प्रविस्मयगताः सर्वे च तत्र स्थिताः ॥ 128

सर्वैरन्यैर्भ्रातृभिर्धर्मदेवा–
शीर्भिः प्राप्तान्यात्मवेषोचितानि ।
चीरादीनि प्रीतचित्तोऽग्रजन्मा–
शात्स्वभ्रातॄन् गन्तुमेकैकशः सः ।। 129

यतिर्नानाविधैरक्षैर्युतं कूर्चं निधाय सः
कक्षे, दैवाद्बहिः सेवामण्डपस्थं विराटपम् ।। 130

उपसर्तुं सुमन्नद्धो बभूव, स जनाधिपः ।
विराटानां विलोक्यैतं चिन्तयामास दूरतः ।। 131

आगच्छति पुमानेष क्वऽत्रासोऽऽस्य न वेद्यते ।
ईदृग्वृत्तेः श्रितेर्हेतुं ज्ञातुकामोऽस्मि सत्वरम् ।। 132

सर्वलोकावने दक्षो मूर्तित्रयसमस्थितिः ।
यतीन्द्रत्वं कथं प्राप्तं बतानेन महात्मना ।। 133

महात्मनोऽस्य शासनात्करोमि कृत्यसन्तति
मनो निहत्य सन्मणीन् ददामि हेमसञ्चयम् ।
मदीयराज्यपालनं यदीच्छति प्रदाय त–
द्भजाम्यमुं स्वसूनुभिः सुहृद्वरैश्च मन्त्रिभिः ।। 134

एवं मत्वा पुरजनचये सम्मुखीभूय याते
भक्त्यासक्त्या स्वयमपि निजादासनादुत्थितः सः ।
प्रत्युद्गम्योत्तम उपगतस्तं प्रणम्य प्रभक्त्या
ऽऽनीय प्राज्यासनमधिगतं मत्स्यभूपोऽत्रदत्तम् ।। 135

क्व ते वासः स्वामिन् वद शुभकुलं तेऽत्र सदयं
समायाने किं स्यात्कुरु सुविशदं कारणमरम् ।
इति श्रुत्वा स्वामी तमवददहमस्मि द्विजवरः
कुरुष्वासं मित्रं यमसुतवरस्यास्मि च यतिः ।। 136

मतोऽहं धीराणां समुचितविनोदैककरणे
विदग्धोऽहं द्यूते मम कुशलताऽनन्यविषया ।
दुराचारैर्धूर्तैर्हृतकनकवित्तः परिभवा—
द्विरक्तः स्वस्थानाच्चलित इह तेऽभ्याशमगमः ।। 137

यापयित्वाब्दमेकं त्वत्सन्निधौ यामि मे रिपून् ।
जेतुं कृतज्ञतायुक्तस्त्वयीदं मे वरं व्रतम् ।। 138

नृपाणां नीत्यां मेऽधिकनिपुणता धर्मनिरतैः
सदाहं वर्ते मां ह्वयति सुजनः कंक इति, मे ।
असभ्यानां सेवा भवति रुचये नो, तव यशो
नुतं श्रावं श्रावं नृपतिषु वरं त्वामुपगतः ।। 139

धर्मजस्य वचः श्रुत्वोवाच श्रीमत्स्यभूधवः ।
वस्तुमर्हसि राष्ट्रेऽस्मिन्यथाभीष्टं यतीश्वर ।। 140

वाहनानि रुचिरोन्नतासना—
न्यन्नवस्त्रगुरुभोगसन्ततिः ।
सन्तु ते मम यथा तथाप्यलं
योऽपराध्यति तवात्र स दण्ड्यः ।। 141

यदि तेऽभिरुचिर्मदीयराज्यं
सकलं शासितुमस्मदीयकैः
सुतबन्धुभिरप्यमात्यवर्गै—
स्तव सेवां रचयामि सर्वथा ।। 142

श्रुतनृपतिवचाः स श्रीयतीन्द्रोऽत्रदत्तं
दरहसितमुखाब्जो रोचते मे हविष्यम् ।
धरणितलशयानोऽहं व्रतं हीदृशं मे
मम खलु निरपेक्षा भोगभाग्यादिकेषु ।। 143

श्रुतयतिवरवाक्यो मत्स्यभूपः प्रहृष्टः
प्रतिवचनमुवाच श्रीयतीन्द्र प्रकामम् ।
तव रुचिमनुसृत्य स्थातुमर्हस्यभीष्टं
समयममितमोदं संदधानः प्रबोधैः ।। 144

इत्युक्त्वासौ मत्स्यभूपो मनीषी
प्रीत्या दृष्ट्वा तं यतीन्द्रं तदीयम् ।
हस्तं हस्तेनावलम्ब्य प्रभूत–
प्रार्वण्येनालापसंसक्त आसीत् ।। 145

दर्वीं हस्ते विशसनवरं स्वीयकक्षे निवेश्यो–
च्छीर्षं भीतावहपृथुदृढांश्चारुदण्डांश्च चित्रम् ।
संव्यानं यद्रचितमजिनेनेभगामी समस्ता–
ताश्चर्याढ्यान्विदधदतिलस्यात्मजो धर्मजेन ।। 146

स्वीकृतं मार्गमुत्सृज्योपधानं च सखड्गकम् ।
चित्रचेलेत संच्छन्नं धृत्वा दृष्टो महीभुजा ।। 147

जुगुप्सयातिभीत्या च संभृतेत स्वचेतसा ।
पृथबाहुं विशालोरःस्थलरेखाद्युतिं नरम् ।। 148

तस्य रूपस्य वैचित्र्यं दृष्टवा परवशं गतः ।
विभ्रान्त्या स्वे मनस्येवंमचिन्तयदसौ नृपः ।। 149

धरित्र्यां विहर्तुं समायात एष
प्रपूतो मनुष्याकृतिं प्राप्य शोभी ।
सरोजातमित्रं विधुर्वा प्रभेत्ता
गिरीणां भवेद्वाऽयमास्ते त शङ्का ।। 150

किं कुलं किं नु नाम स्यादेकोऽपि मम संसदि ।
वर्तते किं, य एनं प्रत्यखिलं वेत्ति तत्त्वतः ।। 151

एवं वदति मत्स्येशे शनैरागत्य वायुजः ।
जयशब्ददीर्यैवं विज्ञप्तिं कृतवान् नृपम् ।। 152

नाम्नाहं वललोऽन्नं मे वस्त्रं दातुं प्रसीद भोः ।
यथारुचि पचन् सेवे त्वामन्नं तण्डुलान् वरान् ।। 153

चतुर्थजातिमानहं भवन्तमत्र सेवितुं
समागतोऽस्मि रोचते यथा प्रभो तथैव ते ।
समस्तपाकसत्क्रियाः करोम्यहं मनोहराः
समस्तपाचकेष्वहं पुरेऽग्रगो भवामि ते ।। 154

इदं निशम्य मत्स्यपोऽवदच्चतुर्थजातिमा–
न्भवानितीति यत्तदस्ति नैव सांप्रतं त्वयि ।
प्रभुत्वकार्यदक्षता तवास्ति दन्तियूथप–
प्रभुं करोमि सत्कृतं भवन्तमुत्तमैः पदैः ।। 155

श्रुतमत्स्येशवाक्यः स साचीकृतमुखः सुतः ।
अनिलस्याऽवदत्स्पष्टं श्रावयंस्तत्र संस्थितान् ।। 156

सर्वैस्तैर्मे किं तवात्र प्रभूता
यद्वत्प्रीतिर्जायते तद्वदेव ।
पाकं शस्तं कर्तुमत्यन्तशक्तः
प्रीणामि त्वां धर्मसूनुं यथा प्राक् ।। 157

यदीच्छसि ममाश्रयं वितर सत्वरूपोऽस्म्यहं
द्विपं चुलुकमुद्धतं हरिवरं च युद्धेस्थिरः ।
सुहन्मि सुकरं प्रभो प्रबलमल्लवीरन्द्रुतं
शतेन सुनिहत्य ते सुविदधाम्यनन्तां मुदम् ।। 158

निशम्य वच आदरात्पवनजोक्तमूचे नृपो
विलोक्य तव रूपमुत्तमपदं मया सूचितम् ।

त्वदर्थमिह वर्तितुं सदयमद्य तेऽङ्गीकृतिं
वद, श्रितमहानसोऽत्र वस पाचकाध्यक्षग: ।। 159

हर्षोत्कर्षं वदन्नेवं मत्स्येश: प्रीतिपूर्वकम् ।
वायुजं पालयामास सोऽपि निर्वृतिमान्बभौ ।। 160

हिमाक्लीष्ट इवादित्यो जलसिक्त इवानल: ।
वेषालंकृतविष्णुर्वा पार्थो मत्स्यपतिं ययौ ।। 161

नत्वा सक्लीबरूपेण वधूरूपेण संयुत: ।
आत्मानं दर्शयामास मत्स्यभूपाय फल्गुन: ।। 162

दृष्ट्वातं वदति स्म भूपतिरिदं तत्रत्यसभ्योत्तमा–
न्योषिद्द्वेषयुतोऽप्ययं वपुरिदं स्वाभाविकं न स्त्रियाः ।
पं स्य ।रिक मिदं धृतं दृढतप:सक्तेन क्रीडाकृते
पूज्येनोन्नतवंशजेन रजसाविष्टेन केनाप्यहो ।। 163

निश्चप्रचं निगदितुं न समर्थ एको–
ऽप्येवं स्थिते स विजयः समुपेत्य भूपम् ।
प्रोवाच चैवमहमुन्नतवंश्यकन्या–
नाटयोपदेशकरणे कृतहस्त आसम् ।। 164

त्वत्सेवाकाङ्क्षयात्राहमागतोऽस्मि नृपाग्रणी: ।
प्रसीदानुगृहीतुं मां बृहन्नलसमाह्वयम् ।। 165

श्रुत्वेदं मनसि व्यचिन्तयदसौ राजोन्नतोर:स्थलं
कञ्जातायतलोचनं भुजयुगेनात्यायतेनान्वितम् ।
प्रत्यादेशमनङ्गकौशिकयुगस्यामोघलीलायुतं
सृष्ट्वेमं कृतवान्नपुंसकमहो धाता नृशंसो बत ।। 166

(13)

विचिन्त्यैवं भूपोऽवददसमचापेन रुचिरैः
पृषत्कैर्दंशेन प्रथितमणिविद्धेन महितम् ।
भवन्तं सत्कृत्योत्कटविभवदर्पप्रविदितं
महाराज्योपेतं सपदि सुविधातुं मम कृतिः ॥ 167

वयं त्वां मत्स्यराज्यस्य श्रिया युक्तं चिकीर्षवः ।
त्वद्वाक्यं सर्वथास्माकमिच्छायाः प्रातिकूल्यकृत् ॥ 168

बृहन्नलो निशम्य श्रीमत्स्याधीशस्य सादरम् ।
वाक्यं तं प्रत्युवाचैवं विवृण्वन्स्वीयवृत्तकम् ॥ 169

नास्ति स्त्रीत्वं नास्ति पुंस्त्वस्य रीतिः
क्लीबत्वं मे प्राप्तमत्युग्रशापात् ।
भोग्यं कोऽपि प्राक्तनात्मीयकर्म—
प्राप्तं भावं लङ्घितुं नैव शक्तः ॥ 170

उपपत्तेरभावात्न्मे भिन्नवृत्तेरहं शनैः ।
कुण्डलीं प्रेखणं बाल्यादशिक्षे रम्यनर्तनम् ॥ 171

विश्रुतानि सुवाद्यानि मञ्जुश्रुतियुतानि ताः ।
गीतानां सुगतीश्चाभिनयं जानामि कृत्स्नशः ॥ 172

चातुर्यहीनपात्राणामपि सम्यक् श्रमावहान् ।
समस्ताभिनयाञ्शीघ्रमुपदेक्ष्यामि सक्रमम् ॥ 173

आगतां स्वनिदेशेन कुमारीं मत्स्यभूपतिः ।
चक्रे नाट्योपदेशार्थं बृहन्नलवशं गताम् ॥ 174

नृत्यविद्योपदेशस्य प्राग्भूपस्तं गुरूत्तमम् ।
ताम्बूलाम्बरभूषाद्यैः सत्कृत्यावददात्मजाम् ॥ 175

प्रेयो मित्रं बन्धुता वा समग्रा
माता भ्राता देशिकः सर्व एषः ।
भक्त्या सक्त्या श्रीगुरुं सेवमाना
विद्यां प्राप्तुं त्वं यतस्वार्हरीत्या ।। 176

आस्माकीने हर्म्यभागेऽयमार्यः
स्वेच्छापूर्वं संचरेद्युक्तरीत्या ।
शाकं रुच्यं चान्नपाने सुमादी-
न्यस्मै भक्त्या दातुमर्हस्यनूनम् ।। 177

समुपगम्य स मत्स्यमहीधवं
नकुल एवमुवाच महीपते ।
हयकलाकुशलस्तव सेवनं
चरितुमत्र समागतवानहम् ।। 178

दामग्रन्थ्याह्वयोऽहं हयगतिमखिलां मुख्यचिह्नानितेषाम्
गर्भारिष्टानि चायुःपरिमितिगणनामिष्टभोज्यप्रदानम् ।
व्यायामं पोषणं तद्धृदयगतमतं भीतिसंरंभवृत्त्योः
शिक्षां तज्जातियोग्यां तुरगततिगतं सर्वरोगस्य तत्त्वम् ।। 179

जानामि सर्वं कृपया प्रभो मां
नियुंक्ष्व वाहावनकर्मणि, स्वाम् ।
सेवेऽतिभक्त्या प्रथमं दयालु-
र्धर्मात्मजो मामवति स्म भव्यः ।। 180

तुरङ्गशिक्षानिपुणं स धर्मजो
नियुज्य मां स्वीयतुरङ्गपालने ।
अभेदभावं सहजैः स्वकीयैः
पुपोष, तत्याज पदं स्वकीयम् ।। 181

विधेर्बलात्स्ववैमुख्यादद्य कुत्रापि भूधव: ।
गतो, निराश्रयोऽहं, मां रक्षाश्रयसुकल्पनात् ।। 182

निशम्य सम्यङ्महनीयकीर्ति
तवातिसक्त्या समुपागतस्त्वाम् ।
इतीरितं तेन नृपो निशम्य
जगाद चेदिच्छसि वाहपोषम् ।। 183

तुरङ्गशालाधिपतित्वशोभी
नियुक्तपूर्वान्पुरुषान्यथाहम् ।
तथा स्वकृत्यैकरतान्विधाय
त्वं सर्वरीत्या भव जागरूक: ।। 184

उक्त्वेवं मत्स्यभूजानिर्नकुलं तं सगौरवम् ।
परिपालनकार्येऽश्वततीनां स न्ययोजयत् ।। 185

विवृण्वन्स्वातिशान्तत्वपावनत्वे च कौशलम् ।
सहदेव: समायातो मूर्तिमान्ज्वलनो यथा ।। 186

पशुरज्जुततिं धृत्वा रज्जुबद्धवलग्नक: ।
साक्षाद्गोपस्य वेषेण सहदेवो विलोकित: ।। 187

धृत्वा दण्डं मसृणमसमेनात्मरूपेण भूपं
सर्वान् गृह्णन् कमलदलसङ्काशनेत्रद्वयेन ।
शोभी पश्यन् विकृतविकृतैरीक्षणै: संविधाया-
ऽऽक्रान्तान् भीत्या सकलमनुजान् संभ्रमेण प्रकामम् ।। 18

सहदेवो विराटानामीशं सम्यक् शनै: शनै: ।
विनयेनागतोऽवोचद्दधाञ्जलियुती वच: ।। 1

आयुक्तं पशुवर्गाणां पालनस्य महीपते ।
कर्तुमर्हसि मां तत्र कृतहस्तोऽस्म्यसंशयम् ।।

गोपङ्क्तयो न हि रुजा विपदं व्रजेयु-
स्तृष्णाश्रमश्च न भवेत्पशुसंहतीनाम् ।
नो मृत्युसाध्वसमुदेति मृगादनेभ्य:
क्षीरादिवृद्धिरधिका मम पालने स्यात् ।। 191

श्रुत्वेदं वचनं जगाद नृपतिस्त्वय्यस्ति नो गोपता
त्वद्रूपस्य निकामसौष्ठवमपि त्वत्प्रौढताऽभीरुता ।
त्वत्सूर्येन्दुकुलप्रसूतिमनघां त्वन्मान्यतां शूरता-
मैश्वर्यं ह्यनुमापयन्ति सुदृढं धात्र्यां मनुष्याग्रणो: ।। 192

स्थित्वा योग्यपदव्यां त्वं मद्राज्यावननिष्ठित: ।
प्रसीद वर्तितुं हीनवृत्तिं मां याचसे कथम् ।। 193

श्रुत्वा वाक्यं मत्स्यनाथोक्तमार्यो
माद्रीसूनु: सोऽवदन्नीचसूति: ।
बालत्वान्मे नास्ति निर्वाहशक्ति-
र्बाध्यत्वाढयानीकरक्षाक्रियाणाम् ।। 194

प्राग्धर्मजस्य संरक्षां पशूनां सम्यगाचरम् ।
अप्रीणयं मनस्तस्य तन्त्रीपालाभिधोऽस्म्यहम् ।। 195

पशुरुजादिनिदानविशारद:
पशुगणामयभेषजकृद्वर: ।
पशुहिताम्बुतृणेङ्गितवेदिता
पशुप एव वसामि तवान्तिके ।। 196

श्रुत्वाधिप: स दयया सहदेववाचं
प्रोवाच ते यदि भवेद्रुचये पशूनाम् ।
संरक्षणं, यदि न ते वद रोचतेऽन्य-
त्कार्यं, सगौरवमिहाव गवां चयांस्त्वम् ।। 197

नियुक्तपूर्वाखिलगोपवर्गैः
संमानितस्त्वं भयभक्तियुक्तैः ।
उदात्तरीत्या कुरु गोपवर्ग—
प्रपालनं मे गुरुतां वितन्वन् ।। 198

एवं नियोज्य सहदेवममुं स्वधेनु—
रक्षाकृतावलभतात्मनि निर्वृतिं सः ।
पश्चात्तदीयनगरीं गतवत्यनिन्द्या
द्रौपद्यभीष्टवसतिं समवेक्षणाणा ।। 199

सरोजिनी वा हिमवृन्दबाधिता
विधोः कलेवाम्बुदपुञ्जसंवृता ।
रजोऽभिलिप्ता लतिकेव नूतना
शिखेव धूमावृतदीपकस्य वा ।। 200

सैरन्ध्रीवेषहेतोः संहृतदीप्तिः पुरान्तिके ।
द्रुपदस्यात्मजा दृष्टा जनैर्वीशियां ससंभ्रमैः ।। 201

कात्वं कस्मै निमित्ताय पृष्टा कुत्र गतिस्तव ।
इति सावददत्यन्तसौजन्येन जनांस्तदा ।। 20

गन्धकारिकाहमस्मि ये वदान्यतायुताः
संप्रदाय मेऽन्नवस्त्रमुत्तमं ममाश्रयम् ।
पालयन्ति तद्‌गृहेषु सभ्यतायुता भृशं
कृत्यसन्तर्तिं विधाय वर्तितुं यतेऽन्वहम् ।।

संनिशम्य ते तदीयवाक्यधोरणीं समं
शङ्कया च विस्मयेन नो विशश्वसुस्तदा ।
संकुलं परिक्षिपन्ति ते स्म च स्वभावनैः
सा विवेश राजमन्दिराङ्गणं ससंभ्रमा ।।

प्रासादभागात्प्रसमीक्ष्य देवी
मत्स्याधिपस्यादरतः स्वयं सा ।
प्रेष्ये विसृज्यात्मगृहोपरिस्थ-
स्थले स्थितां तामकरोदनिन्द्याम् ।। 205

चरणदीधितिलिप्तधरास्थलं
रुचिरकुंकुमलिप्तमिवाबभौ ।
तनुरुचाऽऽवृतभित्तितितिर्महा-
मणिमयीव रराज निरन्तरा ।। 206

नयनकान्तिविकीर्णपुरःस्थलं
सुशुशुभे ततपुष्पकदामवत् ।
उपरिभाग उदात्तशिरोजसं-
हृतिरुचा सुवितानमिवाबभौ ।। 207

तस्याः प्रवेशहेतोस्तन्मत्स्याधिपगृहं बभौ । 208
विनूत्नकान्तिसंच्छन्नमिव, सा महिषीं ययौ ।।

दृष्ट्वा विराटनृपते र्महिषी वधूं ता-
मत्यादरेण ततनूतनकान्तिकान्ता ।
मन्दस्मितेन रुचिरास्यनवाम्बुजेन
प्रत्युज्जगाम तनयां द्रुपदस्य भव्याम् ।। 209

आपादमस्तकं वीक्ष्य तस्या रूपं सकौतुकम् । 210
पप्रच्छ द्रौपदीमेवं महिषी मत्स्यभूभुजः ।।

किं ते कुलं त्वच्छुभनाम किं स्या-
त्को वा पतिस्ते, गमनं त्वदीयम् ।
कुत्र, त्वदीयागमनस्य हेतुः
कः; सर्वमेतद्विशदीकुरु त्वम् ।। 211

आकर्ण्येमां वाचमुक्तां महिष्या
प्रीवाचैवं द्रौपदी शान्तचित्ता ।
सैरन्ध्रीणां सत्कुलेऽहं सुजाता
पञ्चाभिज्ञा मे प्रियाः सन्ति शूराः ।। 212

केशकर्षणेन भर्तृसन्निधौ स्वशत्रुभि–
न्र्यक्कृता वनं गता स्वभर्तृभिः फलैर्जलैः ।
वृत्तिमाचरं ममेष्टमेकवत्सरं त्वया
गूढवृत्तिसंश्रयेण वर्तितुं समागता ।। 213

मालिन्याख्यासमाहूता जनैरहमितीरितम् ।
द्रौपद्या वचनं श्रुत्वा सुदेष्णैवमुवाच ताम् ।। 214

विद्युल्लतां भूमिगतां विलोक्य
त्वां मे प्रियः कामुकताभिभूतः ।
न मे यथा प्राग्दयते त्वदीया
सेवा भवेन्मे न कदापि साध्या ।। 215

कर्कटीवाद्यगर्भस्य धारणेन यथा तथा ।
स्वीकृत्य त्वां कथं नाशं न विन्देयं सुदुर्भराम् ।। 216

इमां श्रुत्वा वाचं द्रुपदतनया राजमहिषी–
मवोचद्यः कोऽपि श्रितकलुषवृत्तिर्मम पुरः ।
स्थितश्चेत्तं हन्युर्निशि वरधवा मे धृतिधना
बलिष्ठा गन्धर्वा हरिहरसहायान्वितमपि ।। 217

न गोचरं मे हृदयं तु तादृशा–
विनीतपुंसो यत उत्कटं मया ।
सुशिक्षणं प्राप्तममूल्यमात्मनः
कुलप्रवृद्धाभ्य उदारदर्शने ।। 218

चित्ते निर्वृतिमेत्य संत्यज शुचं शङ्कां मतौ ते स्थितां
सम्यवपालय मामहं तव रुचिर्यद्वत्तथा त्वां श्रिता ।
भीत्या भक्तियुता च मामककृतीर्निर्वाहयाम्यन्वहं
मद्वृत्ति सकला यथा कुलजनाः शंसेयुरार्याः स्त्रियः ।। 219

न नियोजयन्त्यवमकर्मकृतौ मां
परिपालयन्ति सुजना दयया ये ।
पतयो ममापि सदयं नुतवृत्ता
गणयन्ति तानतितरां हितबुद्ध्या ।। 220

सुहृष्टचित्ता महिषी सुदेष्णा
तां सानुमेने द्रुपदस्य पुत्रीम् ।
स्वां सेवितुं, सा द्रुपदात्मजाता
तां प्रीणयामास शुचिप्रवृत्त्या ।। 221

एवं पञ्च सगर्भ्यास्ते द्रौपद्या सह पत्तने ।
विराटाधिपतेर्गूढवृत्त्या वासं न्यवर्तयन् ।। 222

इति शम्

शुद्धिपत्रिका

धर्मंजराजसूयम्

श्लोकसं	असाधुः	साधुः
3.	महे	महो
21.	ज्ञीतिथि	ज्ञीतिभि
34.	दक्षिणाय	दक्षिणीय
40.	प्राकृतँ	प्राकृतं
41.	भीष्मादनां	भीष्मादीनां
42.	प्रप्ति	प्राप्ति
45.	पूया	पूज्या
46.	निचये	निचयै
48.	पायो	पाद्यो
97.	धन्त्यवं	धन्यत्वं

कोशिकधर्मव्याधोपाख्यानम्

श्लोकसं	असाधुः	साधुः
13.	सर्वे	सर्व
76.	जाती	जाते
84.	पृष्टवा	दृष्ट्वा
95.	प्रलले	प्रलये
97.	हर्ँ	अर्हँ
100.	त्यन्य	त्मत्य
108.	सक्य	सत्त्व
119.	कुर्वन्	कर्मकुर्वन्
125.	उक्तेवं	उक्त्वैवं

श्लोकसं	असाधुः	साधुः

श्रीकृष्णदौत्यम्

श्लोकसं	असाधुः	साधुः
22.	वृद्धिः	वृत्तिः
42.	विन्धा	निन्द्या
42.	स्पस्ते	स्युस्ते
47.	मेदान्धः	मदान्धः
56.	भीतित्वेन	भीतितत्वे
47.	तदीय	स्तदीय
60.	मपीहित	मवश्यमीहित
61.	कर्ति	कर्तुं
67.	फलगतो	फलगतो
77.	युद्धो	युद्धे
96.	यद्धस्याथि	युद्धस्य'जि
107.	क्रान्तान्	क्रान्त्वा
115.	कृते	कृती
125.	तृप्तो	दृप्तो
639.	विने	दिने
145.	मेत्राभ्यां	नेत्राभ्यां
154.	मुक्ति	भुक्ति
157.	तीन्तु	तीन्दु
186.	नेतृत्व	नेत्रित्व
264.	स्वं	तं

दुष्यन्तचरितम्

श्लोकसं.	असाधु:	साधु:
39.	सखीभी:	सखीभि:
58.	वमाकण्यं	समाकर्ण्य
109.	विद्यां	विधा
113.	राज्यपदं	राज्यभारं
113.	त्प्रभुम्	त्प्रभु:

पाण्डवकृतविराटाश्रयणम्

श्लोकसं.	असाधु:	साधु:
103.	निचयं	निचय:
147.	चेलेत	चेलेन
156.	संस्थितान्	सुस्थितान्
161.	हियावली	हिमावलि
167.	विद्धन	विद्धेन

श्लोकसं.	असाधु:	साधु:
179.	मोज्य	भोज्य
181.	पलनं	पालने
181.	अभेदमावं	अभेदभावं
183.	पषम्	पोषम्
185.	उक्त्वेवं	उक्त्वैवं
187.	खाक्षद्गापस्य-	खाक्षाद्गापस्य
189.	विनय	विनये
192.	मनुष्याग्रण:	मनुष्याग्रणी:
195.	वाच	वाचं
201.	स	सा
203.	सनिशम्य	सं निशम्य
204.	प्रसाद	प्रासाद
	सु-शशभे	सुशुशुभे

K R. SUBRAMANYAM
Vice-Principal and
Head of the Department of English
Hindi Mahavidyalaya Hyderabad

2-2-5, University Road,
Hyderabad-500 068

Rarely one comes across a scholar of the type that Sri Garikapati Lakshmi Kantiah is. Brought up in the traditional form of learning, he has kept up the tradition and glory of his forebear, the great Logician Annambhatta, and served the cause of Sanskrit up to the ripe age of eighty two, His works in Sanskrit are numerous and they speak volumes of his sincerity in serving this great language. A profound scholar in Telugu and Sanskrit, he has successfully transmitted the rich flavour of the Telugu Classics-Pothana's (Bhagavatam) and the Andhra (Mahabharatam) of Nannayya Suri and others etc. to the wider world of the Sanskrit scholars. But for this noble attempt of his, the rich nuances of sweet Telugu would have been lost to the world of scholars. With his facile pen he has served a rich fare for the delectable enjoyment of the learned. He has published these books with the blessings of no less a person than the Saint of Sringeri which have added to their value inmensely.

I consider myself extremely fortunate and blessed in associating my self witn this publication.

(Sd.) K. R Subrahmanyam
M.A. (Skt) M,A.M, Phil, (Eng)

8528



गरिकपाटि लक्ष्मीकान्तः एम.ए. (विद्वान्)

8
GA
JAC

जितेन्द्र प्रिंटिंग वर्कस्, कुतबीगुडा, हैदराबाद